# नवमः सर्गः।

पूर्वसर्गे नलस्यात्मीयादृश्यत्वेच्छां दर्शयित्वा तद्-र्शनानन्तरं तदीयरूपलावण्यगाम्भीर्यमाहात्म्यादिभिर्गुणैः सर्वासामन्तः-पुर[1]पुरन्ध्रीणाम् अद्भुतस्मिततापूर्वकमप्रागल्भ्यं दर्शयित्वा दमयन्त्या एव प्रागल्भ्यवशात् नलसंवादपूर्वं केशादिनखपर्यन्तं तामेव निर्वर्ण्य इन्द्रादिदिक्पालानां सन्देशकथनेन दूतधर्मं निर्व्याजं व्यञ्जयित्वा, इदानीं नलस्य कुलनामप्रश्नस्य ~~श्री~~ प्रतिवचनमुखेन क्रमेण नलमपि प्रकटं चिकीर्षुः उभयोरप्युत्क्रान्तिं [वि]वर्णयिषुः श्रीहर्षमहाकविर्नवमं सर्गमारभते।

इतीयमक्षिभ्रुवविभ्रमेङ्गितस्फुरामनिच्छां सुतनुर्विवृण्वती[4]।
तदुक्तिमात्रश्रवणेच्छयाऽशृणोद्दिगीशसन्देशगिरां न गौरवात् ॥१॥

इतीयमक्षिभ्रुवेति[2]। इयं दमयन्ती सुतनुः [इत्येवं[3]-प्रकारां] दिगीशानां सन्देशगिरां तस्य नलस्य उक्तिमात्रश्रवणस्य इच्छया श्रुतिसुखेच्छया अशृणोत्, न तु आसां गौरवात्। किं कुर्वन्ती? अनिच्छां विवृण्वती। विवरीतुमुत्सुका इति पाठान्तरम्। किंभूताम्? अक्षिणी च भ्रुवौ च अक्षिभ्रुवं तस्य विभ्रमेङ्गितेन अक्षि-भ्रूसंज्ञादिचेष्टाभिः स्फुरां प्रकटाम् अनिच्छाम्। अचतुर[4]विचतुर-सुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीव-

1. P. पुरसुन्दरीणां — । 1 P2 text विवरीतुमुत्सुका 2 P. इतीयमिति P2 om. इत्येवंप्रकारा 4 P2 अचतुरविचतुरेति अजन्तनिपातः। ——

सर्ग ९ 2

[पदष्ठीवोन्नक्तंदिवरात्रिंदिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः (पा० V iv 77) इति पाणिनिप्रणीतसूत्रेण [5] द्वन्द्व[6] [नि]पातेनाऽदन्तता।[7] वष्टि भागुरिरल्लोपमि (वा०–पा० II iv 42) त्यादिना टापो विधानात् गिराशब्दः।[ गिरमिति पाठान्तरम् वंशस्थवृत्तम् ]॥१॥

---

तदर्पितामश्रुतवद्विधाय तां द्विजीशसन्देशमयीं सरस्वतीम् ।
इदं तमुर्वीतलशीतलद्युतिं जगाद वैदर्भनरेन्द्रनन्दिनी ॥२॥

---

तदर्पितामिति। सा वैदर्भनरेन्द्रस्य नन्दिनी देवी तम् उर्वीतलस्य शीतलद्युतिं चन्द्रं नलम् इदं जगाद। किं कृत्वा? तेन[1] दूतेन अर्पितां[2] तां द्विजीशानां सन्देशमयीं सरस्वतीं वाणीम् अश्रुतवत् अनाकर्णितामिव विधाय। तत्प्रकृतवचने मयट् (पा० V iv 21)[3] ॥२॥

---

मयाङ्ग! पृष्टः कुलनामनी भवानमू विमुच्यैव किमन्यदुक्तवान् ।
न मह्यमत्रोत्तरधारयस्य किं ह्रियेऽपि सेयं भवतोऽधमर्णता ॥३॥

---

मयाङ्ग! पृष्ट[1] इति। अङ्ग इत्यहो[2] मया त्वं त्वत्सम्बन्धिनी कुलं च नाम च ते पृष्टः सन् अमू द्वेऽपि विमुच्य परित्यज्यैव किमन्यत् किमपि[3] उक्तवानसि? किं[4] भो![5] वत इयं सा अधमर्णता ऋणप्रतिदानं ह्रियेऽपि लज्जायै न भवति। अपि तु तथा। किंभूतस्य तव? मह्यम् अत्र प्रश्ने उत्तरं प्रतिवचनमेव ऋणं धारयतीति उत्तर–

---

5 P1 नर्दिवरजस० 6 BP1P2 द्वन्द्व० ed2 द्वन्द्व० 7 P2 add. हलन्तानां — ॥१॥ 1 P1 om. तेन 2 B अर्पितानां 3 P1 add. उपमा रूपकं च ॥; B इति मयट् ॥२॥ 1 P1 मयेति। 2 P1 add. अभीष्टप्रश्ने; P2 om. इति 3 P1 add. अप्रस्तुतं द्विजीशवाचिकं 4 P1 भवतस्तवाऽधमर्णता 5 P1 अत्र उत्तरप्रश्ने ——

सर्ग ९ 3

धारय: तस्य तथा। [अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेति-सातिसाहिभ्यश्च (पा० III.i.138) इति शः। कात्यायनीये तु], साहिसातिवेदी (IV.ii.54) इत्यादिना धारे: शः प्रत्ययः। धारेरुत्तमर्ण: (पा० I.iv.35) इति सम्प्रदानम्। [द्वयेऽपि सेयमिति पाठद्वयेऽप्यत्र अधमर्णतैव इति व्याख्या।]॥३॥

---

अदृश्यमाना क्वचिदीक्षिता क्वचिन्ममानुयोगे भवत: सरस्वती।
क्वचित्प्रकाशां क्वचिदस्फुटार्णसं सरस्वतीं जेतुमना: सरस्वतीम् ॥४॥

---

अदृश्यमानेति। इयं भवत: सरस्वती वाणी सरस्वतीं नाम्नीं सरस्वतीं नदीं जेतुमना वर्त्तते। किंभूता? क्वचित् मम अनुयोगे कुलनामप्रश्ने अदृश्यमाना। तथा क्वचित् इन्द्रादिसन्देशे ईक्षिता दृष्टा। किंभूताम्? क्वचित् कुरुक्षेत्रे मोक्षतीर्थादौ च प्रकाशां प्रकटाम्। तथा क्वचिच्च प्रयागे विनशनादौ अस्फुटम् अप्रकटम् अर्ण: पानीयं यस्या: तां तथा॥४॥

---

गिर: श्रुता एव तव श्रव:सुधा: श्लथा भवन्नाम्नि तु न श्रुतिस्पृहा।
पिपासुता शान्तिमुपैति वारिजा न जातु दुग्धान्मधुनोऽधिकादपि॥५॥

---

गिर: श्रुता एव [इति]। तव श्रवसो: कर्णयो: सुधारूपा गिर: श्रुता एव। तु पुनर्भवतो नाम्नि श्रुते: श्रवण[स्य] स्पृहा न श्लथा वर्त्तते। [अभवदिति भवतेर्लङि क्रियापदं वा]। यत: वारिण: उदकाज्जाता

---

6. B. उपसर्गा० 7. O. पारि० 8. O. कात्यायनीये तु 9. O. साहिसातिधारे: — ॥३॥
1. अदृश्यमाना क्वचिदित्यादि। 2. B. नाम्नी 3. O. adds चिरन्तनालङ्कारिकोक्तमतेन क्वचिदित्यस्य त्रिरावृत्ति:॥४॥ 1. O. गिर इति। 2. गिर: श्रुतेरिति। 3. नाम

सर्ग ९ 4

पिपासुता पानेच्छा जातु[3] कदाचिदपि[4] उदकापेक्षया अधिकादपि दुग्धान्मधुनश्च न[iiii] शाम्यति। केचिदाहुः मधुनः सकाशादधिकादपि दुग्धात् न शान्तिम् उपैति, किन्तु वारिण एव ॥५॥

बिभर्ति वंशः कतमस्तमोपहं भवादृशं नायकरत्नमीदृशम्।
तमन्यसामान्यधियावमानितं त्वया महान्तं बहु मन्तुमुत्सहे ॥६॥

बिभर्ति[1] वंश इति। कतमो वंशः अन्वयः ईदृशं भवादृशं नायकरत्नं स्वामिनं तेजसा तमोपहं पापहन्तारं[2] बिभर्ति? कस्मिन् वंशे[3] जातः? हारमध्यस्थरत्नं[4] नायकाख्यं[5] वंशमध्येऽपि उत्पद्यते। तदपि अन्धकारं हन्ति। अहं तम् अन्वयं त्वया कृत्वा[6] महान्तं भणित्वा बहु मन्तुम् उत्सहे। तत्र[7] बहुमानं करोमि। यतः पूर्वम् अन्येषाम् अन्वयानां सामान्यधिया समानबुद्ध्या अवमानितम् अवगणितम् ॥६॥

इतीरयित्वा विरतां स तां पुनर्गिराऽनुजग्राहतरां नराधिपः।
विरुत्य विश्रान्तवतीं तपात्यये घनाघनश्चातकमण्डलीमिव ॥७॥

इतीरयित्वेति[1]। स नराधिपः तां देवीम् इति ईरयित्वा विरतां सतीं पुनरपि गिरा अनुजग्राहतराम् उवाच। यथा घनाघनः तपस्य ग्रीष्मस्य अत्यये वर्षागमे विरुत्य शब्दं कृत्वा विश्रान्तवतीं चातकमण्डलीं कृपया कारणभूतया गिरा गर्जितेन अनुगृह्णाति ॥७॥

3 P2 om. जातु 4 P1 P2 om. अपि 5 P2 om. न — ॥५॥
1 P1 बिभर्ति। 2 P2 पापहन्तारं 3 P1 वंशे त्वं 4 P1 मध्यस्थितं 5 P1 नायकमध्यं 6 P2 om. कृत्वा 7 P1 अत्र — ॥६॥
1 P1 इति। ———— ॥७॥

सर्ग ९ 5

अये! ममोदासितमेव जिह्वया द्वयेऽपि तस्मिन्ननतिप्रयोजने।
गरौ गिरः पल्लवनार्थलाघवे मितं च सारं च वचो हि वाग्मिता॥८॥

---

अये![1] ममेति। अये आमन्त्रणे। मम जिह्वया तस्मिन्
कृत्स्नस्य[2] नाम्नश्च[3] द्वयेऽपि प्रश्नविषये उदासीतमेव उदासीनया जातम्।
यतः किंभूते? न अतिशयेन प्रयोजनं यस्य तस्मिंस्तथा निष्कार्ये। यतो
यस्मात् गिरो वाण्याः पल्लवनं बहुभाषिता अर्थस्य लाघवं च[4] स्व-
ल्पार्थकथनं च उभयमपि गरौ विषसदृशौ। किन्तु सा वाग्मिता प्रशस्त-
वक्तृता यन्मितं[5] स्वल्पपदं सारं महार्थं च वचः। वाचो ग्मिनि (पा० ५।
२।१२४) रिति ग्मिनिः॥८॥

---

वृथा कथेयं मयि वर्णपद्धतिः कयाऽऽनुपूर्व्या समकेति केति च।
उभे समअव्यवहारमावयोः पदे विधातुं खलु युष्मदस्मदी॥९॥

---

वृथा[1] कथेयमिति। तावत् इयं कथा इति कथनं
वृथा व्यर्थम्। यत् मयि विषये का[2] वर्णानां पद्धतिः? नाम्नि के वर्णाः?
तथा सा पद्धतिः कया[3] आनुपूर्व्या केन क्रमेण समकेति सङ्केतिता?
[अयमभिसन्धिः — नलनाम्नि तावत्] नकाराकारलकारा[4] [कारा] वर्णाः। तत्र
च लः प्रथमं नकारः पश्चात्। अथ नः पूर्वं लकारः पश्चादिति च कथा
व्यर्था। खलु यतः आवयोः समं प्रत्यक्षं व्यवहारं[5] वार्त्ता युष्मच्च
अस्मच्च एते द्वेऽपि पदे विधातुं[6] उभे समर्थौ।[7] परोक्षव्यवहारे हि नाम-

---

1 P. अये इति। 2 B कृत्स्नस्य 3 P2 नाम्नां 4 P2 add. स्व० 5 P1 मिति; and add. काव्यलिङ्गमर्थान्तरन्यासश्च॥८॥

1 P1 वृथेति। P2 वृथा कथेति। 2 P2 om. का 3 P1 कथा 4 P1 नकारलकारा m; P2 ~~नका~~ नलकाराकारलकारा 5 B P1 P2 वार्त्ताव्यवहारं; eds. व्यवहारं वार्त्ता 6 P1 ~~add.~~ विधातुं Reg 7 P1 add. अस्मत्पाठे समर्थत्वं विधेयम् ———

ग्रहणपूर्वकं वार्त्ता क्रियते। प्रत्यर्थं तु 'त्वं गच्छ', 'अहं करोमि' इत्यादि-
नैव भवति[8]॥९॥

---

यदि स्वभावान्मम नोज्ज्वलं कुलं ततस्तदुद्भावनमौचिती कुतः।
अथाऽवदातं तदहो विडम्बना तथा[1] कथा प्रेष्यतयोपसेदुषः[2]॥१०॥

---

यदि[3] स्वभावादिति। यदि मम कुलं स्वभावादेव
उज्ज्वलं न भवति। किन्तु सकलङ्कं स्यात्। ततः तस्य कुलस्य उद्भा-
वनं कथनं मम कुतः औचिती नोचितम्। अथ अवदातं निर्मलं मम
कुलं तत् अहो तथा तादृशी कुलकथनरूपा कथा विडम्बना विगोपकः।
यतः किम्भूतस्य? मम प्रेष्यतया[4] भृत्यतया[5] दूतत्वेन उपसेदुषः लज्जा-
करत्वात्। [कथाप्रेष्य इति समस्तं वा पदम्। कथाप्रेष्यो दूतः][6]॥१०॥

---

इति प्रतीत्यैव मयावधीरिते त्वयाऽपि निर्बन्धरसो न शोभते।
हरित्पतीनां प्रतिवाचिकं प्रति श्रमो गिरां ते घटते हि साम्प्रतम्॥११॥

---

इ[1](125b)ति प्रतीत्येति। इति प्रतीत्यैव[2] विचार्य मया
अवधीरिते ऽवगणिते त्वत्प्रश्ने त्वयाऽपि निर्बन्धरसः आग्रहो न शोभते[3]।
हि यस्मात् हरितां दिशां पतीनां[4] प्रतिवाचिकम् उत्तरदानं प्रति साम्प्रतं
ते तव गिरां श्रमो घटते। [अभितः परितः समयानिकषाहा प्रतियोगेषु[5]

---

8 P. add. आवयोरिति पदं (येऽयादीनि सर्वैर्नित्यम् (पा० I. ii. 72) त्येकशेषः।
अनुप्रासः काव्यलिङ्गम्॥९॥ 1 P2 text यथा तथा 2 P2 text प्रेष्य० 3 P. यदि
स्वभावादित्यादि। 4 P2 प्रेष्य० 5 P. om. भृत्यतया 6 P. add. तदा तथा तेन [struck]
प्रकारेण इत्यर्थः। एतच्च पूर्वोत्तरेण च सम्बध्यते। काव्यलिङ्गम्॥ [struck] १०॥ 1 P. इ
इतीति। 2 P2 प्रतीत्यैव 3 P. add. अवधीरिते कुत्सनामकी इति भिन्नं वाक्यमि-
त्यन्वयः। 4 B पतिनां 5 P2 add. च

इष्यते (वा० 37) इति वचनाद् द्वितीया[6] ॥११॥

तथाऽपि निर्बध्नाति! तेऽथवा स्पृहामिहानुरुन्धे मितया न किं गिरा।
हिमांशुवंशस्य करीरमेव मां निशम्य किं नासि फलेग्रहिर्ग्रहा ॥१२॥

[1] तथापि निर्बध्नतीति[2]। अथ वा हे तथापि[3] निर्बध्नाति! आग्रहपरे अहं मितया संक्षिप्तया गिरा वाचा ते[4] तव स्पृहां किं न अनुरुन्धे ?। अपि तु पूरयामि। त्वं मां[5] हिमांशुवंशस्य[6] करीरम् अङ्कुरमेव निशम्य श्रुत्वा फलेग्रहिर्ग्रहा[7] सफलग्रहे[8] निर्बन्धो[9] यस्याः सा तथाविधा किं नाऽसि न भवसि[9]। वंशो हि करीरेण भक्ष्यते[10]। शमो (870) दर्शने। ॥[11] ऽनुबन्धत्वम्। सोमवंश्यं मां मत्वा सफलाग्रहा भव[12][13] ॥१२॥ / न

महाजनाचारपरम्परेदृशी स्वनाम नामाऽऽददते न साधवः।
अतोऽभिधातुं न तदुत्सहे पुनर्जनः किलाऽऽचारमुचं विगायति ॥१३॥

[1] महाजनाचारेति[2]। ईदृशी महाजनानामाचारपरम्परा। यत्[3] साधवः स्वं नाम नाऽऽददते न कथयन्ति। [अत्रोत्तरश्लोके च आङो दोऽनास्यविहरणे (पा० I.iii.20) इत्यात्मनेपदम्]। नामेत्यभ्युपगमे। अतः पुनरहं तत्[4] स्वं नाम अभिधातुं नोत्सहे[5]। किल[6] यतः जनः आचारमुचं

6 P1 add. अनुप्रासःकाव्यलिङ्गं च ॥११॥ ‖ 1 P1 तथापीति। 2 B निर्बन्ध इति। 3 P1 add. कारणे कथितेऽपि म[...] P1 om. ते 5 P2 om. मां 6 P1 add. वंशोऽन्वय एव वंशो वेणुस्तस्य 7 B P1 P2 om. ०ग्रह; edd. add. ०ग्रहा 8 B ०ग्रहो 9 P2 भवति 10 P1 add. करीरमिति पुंसि नपुंसके वा। यदाह – वंशाऽङ्कुरे करीरोऽस्त्री तरुभेदे घटे च ना (अमर० III.v.17) ॥ 11 P2 मा० 12 B भावय 13 P1 add. अनुप्रासः रूपकं च ॥१२॥ ‖ 1 P1 add. मितया गिरा कुलं कथितमेव नामाख्यानं तु नोचितमित्याह। 2 P1 महेति। 3 B यतः P2 यत्तु 4 P1 om. तत् 5 B नोत्सहते 6 P1 om. यतः

[7] निराचारं विगायति ॥१३॥

---

अदोऽयमाकर्ण्य शिखीव शारदो बभूव तूष्णीमहितापकारकः ।
अथाऽस्य रागस्य दधा पदे पदे वचांसि हंसीव विदर्भजाऽऽददे ॥१४॥

---

अदोऽयमाकर्ण्येति[1] । अयं नलः अदो वचः आकर्ण्य तूष्णीं बभूव । किंभूतः ? अहितानां शत्रूणामपकारकः । तथा शारं[2] शत्रुं [हिंसां] ददातीति । यथा शरत्कालसम्बन्धी शिखी मयूरः अहीनां सर्पाणां तापकरः । वर्षासु आकर्ण्य तूष्णीं भवति । अथ विदर्भजा अस्य नलस्य पदे पदे रागस्य प्रीतेः दधा[3] कर्त्री सती वचांसि आददे । सुप्तिङन्तं पदम् (पा० I.iv.14) का इव ? हंसीव । यथा मयूरानन्तरं शरदि हंसाङ्गना वचांसि मधुराणि वदति । किंभूता ? पदे पदे चरणे चरणे[4] आस्यस्य मुखस्य यो रागो रक्तत्वं तस्य दधा[5] धारयित्री । हंसानां मुखं चरणौ च रक्तौ । [ददातिदधात्योर्विभाषा (पा० III.i.139) ति शः]॥१४॥

---

सुधांशुवंशाभरणं भवानिति श्रुतेऽपि नाऽपैति विशेषसंशयः ।
कियत्सु मौनं वितता कियत्सु वाङ् महत्यहो वञ्चनचातुरी तव ॥१५॥

---

सुधांशुवंशेति[1] । भवान् सुधांशोः सोमस्य वंशे

---

7 P. om. निराचारं — ॥१३॥ / 1 P. अदोऽयमिति । 2 P. सारं 3 P. दधाना 4 P. om. चरणे 5 P. दधाना 6 P. om. शः; but add. हंसीति जात्याख्यायामेकवचनम् । अथवा अथाऽनन्तरमस्य शिखिनः पदे स्थाने हंसी वचांस्याददे । पदे चरणे रागस्य धारयित्री । उपमा श्लेषश्च । 7 P. wrong numberings hereonwards. — ॥१४॥

1 P. सुधामि(धे)ति ।

आभरणभूत: इति श्रुतेऽपि विशेषस्य संशय: सन्देहो न अपैति । कस्त्वम्? इति सन्देहो न याति । अहो तव महती वचनचातुरी विप्रलम्भचतुरता । यत: कियत्सु प्रश्नेषु मौनं कृतम् । कियत्सु च वाग्वितता उत्तरं दत्तम् ॥ १५ ॥

मयाऽपि देयं प्रतिवाचिकं न ते स्वनाम मत्कर्णसुधामकुर्वते ।
परेण पुंसा हि ममापि संकथा कुलाबलाचारसहासनासहा ॥ १६ ॥

मयापि देयमिति । मयाऽपि हे दूत । ते तुभ्यं प्रतिवाचिकं न देयम् । किंभूताय? स्वं नाम मम कर्णयो: सुधाम् अमृतम् अकुर्वते । हि यतो ममाऽपि परेण पुंसा सह संकथा कुलाबलानाम् आचारेण सह या आसना एकस्थानोपवेशनं तत्र असहा असमर्था । कुलस्त्रीणामाचार: परपुरुषवार्त्ता च एकत्र न तिष्ठत: ॥ १६ ॥

इदमभिनन्द्य प्रतिबन्धमनुत्तर: प्रियागिर: सस्मितमाह स स्म ताम् ।
वदामि वामाक्षि! परेषु मा क्षिपस्त्वमीदृशं मामिकमाक्षिपद्वच: ॥ १७ ॥

इदमभिनन्द्येति । स तां सस्मितम् आह स्म । किं कृत्वा? प्रियायाः गिरो वाचा इदम् अभिनन्द्य स्तुत्वा । किंभूत:? प्रतिबन्धा संमुखेन वादेन अनुत्तर: । त्वं यदि नाम न भाषसे ततो ममापि गदितुम् आचारो नास्ति इति प्रतिबन्दीम् उक्त्वा उत्तररहित: कृत: । तादृशमेव

2 B add. न 3 P. वचन° M P. प्रलम्भचतु° 5 P. om. यत: 6 P. प्रदेशेषु 7 P. add. विस्तृतम् 8 B दत्तो 9 P. add. दिगीशसन्देशादिबहुतरमुक्तम् । काव्यलिङ्गम् ॥ १५ ॥ // 1 P. मयेति । 2 B हि 3 P. om. ते M B स्वं; P. स्वयं 5 B एकदेशनं 6 B तत 7 P. add. अनुप्रासो रूपकं काव्यलिङ्गं च ॥ १६ ॥ // 1 P. इदेति । 2 P. add. प्रिया गिर: इति सामानाधिकरण्यं वा

प्रतिवचनं यत्र वादिनं प्रतिक्रियते[3]। सा प्रतिबन्दी नाम उत्तरजातिः। हे वाग्रसवामाक्षि! प्रधाननेत्रे[4]! अहं वदामि। त्वं स्वम् ईदृशं वचः परेषु विषये मा क्षिप[ः] मा वादीः[5]। अहं तु तव परो न भवामि। त्वदीय एवाऽस्मि। किंभूतं वचः?। माक्षिकं मधु आक्षिपत् मधुरत्वेन निर्जयत्[6] ॥१७॥

---

करोषि नेमं कलिनं मम श्रमं दिशोऽनुगृह्णासि न कञ्चन प्रभुम्।
त्वमित्थमर्होऽसि सुरानुपासितुं रसामृतस्नानपवित्रया गिरा ॥१८॥

---

करोषि[1] नेममिति। त्वं मम[2] इमं श्रमं कलिनं सफलं किं न[3] करोषि?। यतः दिशः प्रभुम् इन्द्रादिमध्यात् कञ्चन[न] अनुगृह्णासि।[4] त्वम् इत्थं रसो माधुर्यादि[ः] स एवामृतं तस्य स्नानेन पवित्रया गिरा सन्देशरूपया सुरान् उपासितुम् अर्हसि योग्योऽसि[5] ॥१८॥

---

सुरेषु सन्देशयसीदृशीं बहुं रसस्रवेण स्तिमितां न भारतीम्।
मदर्पिता दर्पकतापिनेषु सा प्रयाति दावार्दितदाववृष्टिताम् ॥१९॥

---

सुरेषु[1] सन्देशयसीति। त्वम् ईदृशीं रसस्य स्रवेण[2]

---

3 P2 क्रियते 4 P2 प्रधाने 5 P2 om. विसर्गः 6 P1 add. अनुप्रासो व्यतिरेकश्च ॥१७॥

1 P1 करोषीति। 2 P1 P2 इमं मम 3 P2 किंभूतं वचः?। 4 P1 add. स्वतन्त्रमेव वाच्यं दिशः प्रभुं कञ्चन किं न अनुगृह्णासि 5 P1 add. कलमहीभ्यामित्युज्(न) च (वा० ४७४) अमृतं सुधा उदकं च। स्नानपूतेन यतो देवा उपास्याः। रूपकं काव्यलिङ्गं च ॥; P2 sup. lin. mg. secus ma. add. यः किल अमृतोदकं स्नानं कुरुते स पवित्रो भवतीत्यर्थः ॥१८॥

1 P1 सुरेष्विति। 2 B श्रवेण अश्रवेण

अरणेन न स्तिमिताम् आर्द्रां बहु[3] महार्घां भारतीं सुरेषु[4] न किं सन्देशयसि॥ [6]सा त्वद्वाणी दर्पकेण कामेन तापितेषु तेषु विषये मया अर्पिता सती दावानलेन अर्दिते दावे कानने वृष्टिरूपतां प्रयाति[7]॥१९॥

यथा यथेह त्वदुपेक्षयाऽनया निमेषमप्येष जनो विलम्बते।
रुषा शरव्यीकरणे दिवौकसां तथा तथाऽद्य त्वरते रतेः पतिः॥२०॥

[1][यथा] यथेति। [यथा] यथा इह त्वत् उपेक्षया औदासीन्येन एष मल्लक्षणो जनः निमेषमपि विलम्बते[2]। [3]त्वदपेक्षयेति पाठे त्वयि अपेक्षया अर्थित्वेनेति व्याख्येयम्। तथा तथा[4] अद्य रतेः पतिः कामः रुषा दिवौकसां शरव्यीकरणे वेधने त्वरते[5]॥२०॥

इयच्चिरस्याऽवदधन्ति मत्सखे किमिन्द्रनेत्राण्यपराणि[1] निर्ममे।
धिगस्तु मां सत्वरकार्यमन्थरं स्थिरः परप्रेष्यगुणोऽपि यन्न न॥२१॥

3 B महार्हां M. P1 add. देवेषु 5 B सन्देशपति 6 P1 add. या भारती सेति पाठे; P2 om. सा 7 P1 add. अनुप्रासो रूपकम् । उपमेत्यन्यः॥१९॥
1 P1 यथेति। 2 P2 निमिष° 3 P1 add. अथवा त्वामुपेत्य उपगम्याऽनुप्रविश्य ईक्षा सुरेषु कस्य तव कीदृक् चित्तवृत्तिरित्येवमीक्षा दृष्टिः परीक्षा इत्यर्थः। तथा च भगवता यास्केन-एवमुच्चावचेष्वर्थेषु निपतन्ति[ते] उपेक्षितव्या (निरु° I.11) इत्युक्तम्। एवमनेन प्रकारेण उच्चावचेष्वर्थेषु बहुप्रकारेषु समाहृताश्चेत्येवं बहु~~[illegible]~~कारा निपतन्ति। प्रयुज्यमानास्ते लक्षणशास्त्रमेतच्चार्थनिर्वचनशास्त्रमुपेत्योपत्याऽनुप्रविश्य ईक्षितव्याः। कः कस्मिन् अर्थे वर्तते इत्येवं द्रष्टव्याः परीक्ष्या इत्यर्थः। इत्याचार्यभगवद्दुर्गेण च व्याकृतम्। 4 P2 om. तथा 5 P1 add. कालाध्वनोरत्यन्तसंयोगे (पा° II.iii.5) द्वितीया। अनुप्रासोऽतिशयोक्तिश्च॥२०॥ 1 P2 text निर्ममौ—

[2] इयच्चिरस्येति। [3] इन्द्रस्य नेत्राणि [4] क्रमम् अशनिवेधं न निर्ममे वज्रेण धारितानि॥ किं कुर्वन्ति?। मत्पथे इयत् अधिकतरं चिरस्य[5] आपदधन्ति। मम मार्गं विलोकयन्ति सन्ति[6]। [मां] पुनः धिगस्तु, [7] अहं तु निन्द्यः। उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु। द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते (वा° 36) इति वचनात् धिग्योगे द्वितीया। किंभूतम्?। सत्वरे कार्ये कर्तव्ये मन्थरं चिर-कारिणम्। यत्र मयि विषये परप्रेष्यगुणोऽपि स्मरो न [स्मितः]। पर-[स्यो] प्रेष्यो दूतोऽहं दूतत्वमपि मयि नाऽस्ति[8] ॥२१[9]॥

---

इदं निगद्य क्षितिभर्तरि स्थिते तयाऽभ्यधायि स्वगतं विदग्धया।
अधिस्त्रि त्वं दूतयतां भुवः स्मरं मनो दधत्या नयनैपुणव्यये ॥२२॥

---

[1] इदं निगद्येति। इदं [2] निगद्य क्षितिभर्तरि नले स्थिते [सति] [3] तया विदग्धया इति स्वगतं मनसि अभ्यधायि[4]। [5] किं कुर्वत्या?। तेषां देवानां नयनैपुण्यं नीतौ प्राविण्यं तस्य व्यये अभावे मनो दधत्या। किं[6] कुर्वताम्?। त्वं भुवः पृथिव्याः स्मरं कामं नलम् अधिस्त्रि स्त्रियं प्रति दूतं कुर्वताम्। एकान्ते मां प्रति ये इमं सुन्दरं[7] दूतं प्रस्थापयन्ति ते नीतिं न[8] ~~जा~~ जानन्ति। अव्ययं [9] विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासम्प्रतिशब्द-प्रादुर्भावपश्चाद्यथानुपूर्व्य[10][11]यौगपद्य[12]सादृश्यसंपत्तिसाकल्यान्तवचनेषु ब-

---

[2] P₁ इयदिति। [3] P₁ अशनिवज्रं here [4] P₁ om. किं [5] BP₂ अवदधन्ति चिरस्य [6] P₂ om सन्ति [7] BP₂ अहं तु निंद्यः alt. चिरकारिणम् [8] P₁ add. चिरस्येति दीर्घकालार्थमव्ययम्। अतिशयोक्तिः। [9] B om. २१. -॥२१॥

[1] P₁P₂ इदमिति। [2] P₂ om. इदं निगद्य [3] B तया [4] P₁ त्वं भुवः... कुर्वताम् here [5] P₁ om. किं कुर्वत्या?। [6] B किं कुर्वती?। ; P₁ om. किं कुर्वताम्?। [7] P₁ दूतं सुन्दरं [8] P₂ om न [9] P₂ °समीपेति विभक्तिवचन° [10] B °पूर्व° [11] B °यौगपद्य° twice.

(पा० II·i·6) इति विभक्तिवचनमव्ययं समस्यतेऽव्ययीभावश्च ॥२२॥

जडाधिपस्त्वामदिशन्मयि ध्रुवं परेतराजः प्रजिघाय स स्फुटम् ।
मरुत्वतैव प्रहितोऽसि निश्चितं नियोजितश्चोर्ध्वमुखेन तेजसा ॥२३॥

जडाधिप[1] इति । यस्त्वां मयि दूतमदिशत् स ध्रुवं[2] जडानामधिपः । अथ च [वरुणो जलपतिः । तथा] यः त्वां [स्त्रियं] प्रजिघाय स[3] स्फुटं न्यायेन परेतानां राजा । प्रेताः किमप्युचितं न जानन्ति । अथ च यमः । त्वं च [निश्चितं मरुत् विद्यते यस्य स मरुत्वान् वायुस्तेन[4] (126 b) प्रहितोऽसि । यः इति न[5] जानाति । यतः[6] स्त्रीपार्श्वे सुभगो दूतो न प्रहीयते । अथ च इन्द्रेण । तसौ मत्वर्थे (पा० I·iv·19) इति तकारः । तथा ऊर्ध्वमुखं यस्य तेन सबलेन[7] तेजसा वह्निना त्वं नियोजितः[8] । अथ च[9] वह्नेस्तेज ऊर्ध्वं प्रसिद्धम् ॥२३॥

अथ प्रकारं निभृतस्मिता सती सतीकुलस्याभरणं किमप्यसौ ।
पुनस्तदाभाषणविभ्रमोन्मुखं मुखं विदर्भाधिपसम्भवा दधे[1] ॥२४॥ /४

अथ प्रकारमिति[2] । असौ विदर्भा[धिप][3]सम्भवा मनसो मध्ये इति विचिन्त्य अथ प्रकारं प्रकटं पुनरपि किमपि तस्य [दूत]स्य[4] आभाषणार्थं विभ्रमेण विलासेन उन्मुखम् अभिमुखं[5] स्वमुखं दधे । परं निभृतं गुप्तं स्मितं हास्यं यस्याः सा तथाविधा सती । तथा सतीनां कुलस्य [किमप्यनिर्वचनीयमाभरणं] माभरणरूपा स्वयम् ॥२४॥

1 P1 जडेति । 2 B ध्रुवं 3 P2 om. स 4 B P2 स्तेन वायु 5 P2 om. न जानाति 6 P1 यतः 7 P1 भबलेन 8 B P2 नियोजितः[च] 9 B च अथ — ॥२३॥ 1 P2 text दधौ 2 P1 P2 अथेति । 3 P2 ०भैश्वर० 4 P1 om. दूतस्य 5 P2 om. अभिमुखं — ॥२४॥

वृथापरीहास इति प्रागल्भता न नेति च त्वादृशि वाग्विगर्हणा। /ग
भवत्यवज्ञा च भवत्यनुत्तरादतः प्रदित्सुः प्रतिवाचमस्मि ते ॥२५॥

वृथापरीहास[1] इति। अहो दूत! अहं ते तव अतः प्रतिवाचं प्रदातुमिच्छुरस्मि। यतो वृथा वचनात् परीहासो वृथापरीहासः इति मध्यमपदलोपः[2]। अयमर्थः — यदि वृथा वदति दूतोऽयम् इति कृत्वा परीहासमात्रमेव क्रियते, तदा[3] प्रागल्भता[4] धृष्टता दोषो मम भवति। तथा त्वादृशि पुरुषे चेत्, न न इति च प्रतिषेधवाक् उच्यते। तदा विशिष्ट गर्हणा मम निन्दा तथा भवति त्वयि विषये[6] उत्तरस्याऽदानात्[7] अवज्ञा च[8] भवति। ततः प्रत्युत्तरं दास्यामि, न त्वङ्गीकारः॥२५॥ /च

कथं नु तेषां कृपयाऽपि वागसावसावि मानुष्यकलाञ्छने जने।
स्वभावभक्तिप्रवणं प्रतीश्वराः कया न वाचा मुदमुद्गिरन्ति वा ॥२६॥

कथं[1] नु तेषामिति। तेषां देवानां मानुष्यकं[2] लाञ्छनं कलङ्को यस्य एवंविधे मल्लक्षणे जने कृपया दययाऽपि कथं[3] नु असौ कलङ्कभावपरा वाक् असावि प्रसूता। ते देवाः, अहं तु नर[4]। कीदृशी? अतिप्रसिद्धत्वेन पूर्वोक्तमर्थमाक्षिपति। अथवा को विरोधः? ईश्वराः स्वामिनः स्वभावादेव भक्तिप्रवणं सेवकं जनं प्रति कया वाचा मुदम् आत्मीयां प्रीतिं न उद्गिरन्ति? अपि[5] त्वयं एष एव देवानां मयि [उद्गिरन्तीति गौणवृत्तिव्यपाश्रयात्। तदुक्तं — निष्ठ्यूतोद्गीर्णवान्तादि[6]

1 P1, P2 वृथेति। 2 P2 मध्यपद० 3 P2 यदा M। P1 add. तदा 5 P1 om. तथा; P2 तथादृशि 6 P1 अनुत्तरात् 7 P1 ०स्याऽप्रदा० 8 P1 om. च; P2 भवति च —॥२५॥

1 P1 P2 कथमिति। 2 P1 ~~[struck]~~ ०ष्यकस्य; and add. मनुष्यसम्भूतस्य लाञ्छने अन्यत् मनुष्यत्वमित्याहुः। 3 P1 om. कथं न M P2 कीदृशी न 5 P1 अपि तु मयि; 6 P2 om. अयं 6 P2 ०दीत्यादि —

गौणवृत्तिव्यपाश्रयम् । अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते ( L. 45 ) इति ॥ उभसर्वतसोः ( वा० 136 ) इत्यत्र तलोऽन्यत्रापीति । अभितः परितः समया निकषा हा प्रतियोगेषु च ( वा० 137 ) दृश्यते इति वचनात् प्रतियोगे द्वितीया[7] ॥२६॥

अहो महेन्द्रस्य कथं मयौचिती सुराङ्गनासङ्गमशोभिताभृतः ।
वृद्धस्य हंसावलिमांसलश्रियो बलाकयेव प्रबला विडम्बना ॥२७॥

अहो[1] महेन्द्रस्येति । अहो महेन्द्रस्य मया भार्यया कथम् औचिती योग्यता ? । किंभूतस्य ? । सुराङ्गनानां[2] सङ्गमेन शोभितां बिभर्तीति तस्य तथा । किं [तु][3] प्रबला विडम्बना विगोपकः । यथा हंसानामावलिभिः[4] मांसला प्रचुरा श्रीर्यस्य[5] एवंविधस्य वृद्धस्य[6] [हि] [बलाकया] प्रबला जुगुप्सा[7] ॥२७॥

पुरः सुरीणां भण केव मानवी न यत्र तास्तत्र तु साऽभिशोभिका ।
अकाञ्चनेऽकिञ्चननायिकाङ्के किमारकूटाभरणेन न श्रियः ॥२८॥

पुरः[1] सुरीणामिति । त्वं भण वद । सुरीणां रम्भादीनां पुरः [मानवी का इव[2] । अपि तु न काऽपि । केनेति पाठे] केन गुणेन मानवी स्त्री अभिशोभिका[3] तु पुनर्यत्र ताः[4] देवाङ्गना न भवन्ति[5] तत्र

7 । vartt. गोत्रोक्षोष्ट्रोरभ्रराजन्यराजपुत्रवत्समनुष्याजाद्वुञ् (पा० IV । 39) इति समूहेऽर्थे वुञ् । अनुप्रास आक्षेपश्च ॥२६॥ // 1 । अहो । 2 । सुराङ्गनास~~ङ्गमे~~ ङ्ग० 3 । B तु म 4 B मावलि० 5 । B श्रीस्सूर्यस्य 6 । B हृदयस्य 7 । vartt. मयोचिता इति पाठे मया विडम्बना कथमुचितेति व्याख्या । अनुप्रास उपमा च ॥२७॥ // 1 । मु(पु)र इति । 2 । कैव 3 B अपि 4 B देवाङ्गनास्ता 5 । B भवति —

पृथिव्यां सा मानुषी अभिशोभिका । [साऽपीति पाठान्तरम्] । यतः[6] अकिञ्चनस्य दरिद्रस्य पुरुषस्य नायिकायाः अङ्के शरीरदेशे[7] अकाञ्चने सुवर्णालङ्कार रहिते किम् आरकूटस्य रीतिपित्तलप्रभृतेराभरणेन श्रियः शोभा न भवन्ति ? अपि तु भवन्त्येव[8] ॥ २८ ॥

यथा तथा नाम गिरः किरन्तु ते श्रुती पुनर्मे बधिरे तदक्षरे ।
पृषत्किशोरी कुरुतामसङ्गतां कथं मनोवृत्तिमपि द्विपाधिपे ॥ २९ ॥

[1] यथा तथा नामेति । नाम ते देवाः यथा तथा[2] गिरः वाक्यानि किरन्तु क्षिपन्तु । मे मम पुनः श्रुती कर्णौ तेषां देवानाम् [अक्षरे] अक्षरमात्र (१२७१) श्रवणेऽपि बधिरे । यतः पृषत्किशोरी मृगी कथं द्विपाधिपे हस्तिनि[3] मनसो वृत्तिम् इच्छामपि कुरुताम् । किंभूताम् ? असङ्गताम् असम्बद्धाम्[4] ॥ २९ ॥

अदो निगद्यैव नतास्यया तया श्रुतौ लगित्वाऽभिहिताऽऽलिराऽलपत् ।
प्रविश्य यन्मे हृदयं ह्रियाऽऽऽर तद्विनिर्यदाकर्णय मन्मुखाध्वना ॥ ३० ॥

[1] अदो निगद्यैवेति । आलिः दमयन्त्याः सखी आलपत् उवाच । किं भूता ? अदः निगद्यैव तया देव्या श्रुतौ [कर्णे][2] लगित्वा अभिहिता उक्ता सती । किंभूतया ? नतम् आस्यं यस्याः, लज्जानम्रया ।[3] इयं[4] दमयन्ती[5] ह्रिया लज्जया मे मम हृदयं प्रविश्य त्वां प्रति यदाह —

6 P. add. किम् 7 P2 शरीरे 8 P. add. अनुप्रासो दृष्टान्तश्च ॥ २८ ॥
1 P. यथेति ; P2 यथा नामेति । 2 P2 om. तथा 3 P2 om. हस्तिनि 4 P. add. दृष्टान्तो विषमोऽपि ॥ २९ ॥ | 1 P. अद इति । 2 P. लगित्वा कर्णौ
3 P2 किंभूतं तया 4 P2 इयन्ती मे 5 B मज्जिया ; P2 मे ह्रिया ———

हे दूत! तत्त्वं[6] मम मुखाध्वना मम वदनमार्गेण विनिर्गत निर्गच्छत् मौनीवचनम् आकर्ण्य। इयं लज्जया मम पार्श्वात् वादयाति[7] ॥३०॥

---

बिभेमि चिन्तामपि कर्तुमीदृशीं चिराय चित्तार्पितनैषधेश्वरा।
मृणालतन्तुच्छिदुरा सतीस्थितिर्लवादपि त्रुट्यति चापलात् किल ॥३१॥

---

बिभेमि[1] चिन्तामिति। अहम् ईदृशी[2] इन्द्रादिवरणलक्षणा[3]-चिन्तामपि कर्तुं बिभेमि। किं भूता? चिराय चित्तेऽर्पितो[4] नैषधेश्वरो[5] नलो यया सा तथा। यतः सतीनां स्थितिराचारः किल लवादपि स्तोकादपि चापलात् त्रुट्यति। किं भूता? मृणालतन्तुवत् छिदुरा त्रुटनशीला। मनसाऽपि परपुरुषः साध्व्या न धार्यः[6] ॥३१॥

---

ममाशयः स्वप्नदशाशयाऽपि वा नलं विलङ्घ्येतरमस्पृशद्यदि।
कुतः पुनस्तत्र समस्तसाक्षिणी निजैव बुद्धिर्विबुधैर्न पृच्छ्यते ॥३२॥

---

ममाशय[1] इत्यादि। [यदि] हे दूत! मम आशयश्चित्तं[2] स्वप्नदशाया आशयाऽपि[3] आदेशेनाऽपि वा अथवा नलं विलङ्घ्याऽ[4]-तिक्रम्य इतरं पुरुषं चेत् अस्पृशत् ततस्तत्रार्थे[5] विबुधैर्देवैः अथ [च] विद्वद्भिः सभ्यैर्निजैव बुद्धिः समस्तस्य लोकवृत्तान्तस्य साक्षिणी कुतः [कथं [पुनः] न पृच्छ्यते? देवाः किल सर्वेषां चित्तस्थितं स्वयमेव जानन्ति[6] ॥३२॥

---

6 P2 om. तत 7 P1 add. अनुप्रासः ॥३०॥
1 P1P2 बिभेमीति। 2 P2 ईदृशं 3 P2 ०लक्षणां 4 P2 ०र्पिता 5 B नैषधो०
6 P1 add. विशेषस्य सामान्येन समर्थनम् अर्थान्तरन्यासः। हेतुरित्यन्य उपमा च ॥३१॥ // 1 P1 ममोमेति। P2 ममाशय इति। 2 P1 आशये 3 P1 om. अपि
4 B विलम्ब्या० 5 B तत्रा० 6 P1 add. अनुप्रासो हेतुश्च ॥३२॥

अपि स्वमस्वप्नमसूषुपन्नमी परस्य दारानवैतुमेव माम् ।
स्वयं दुरध्वार्णवनाविकाः कथं स्पृशन्तु विज्ञाय हृदाऽपि तादृशीम् ॥३३॥

[1] अपि स्वमस्वप्नमिति । हे दूत ! अमी देवाः स्वम् आत्मानम् अस्वप्नमपि निद्रारहितमपि असुषुपन्[2] स्वापितवन्तः । किं कर्तुम् ? मां[3] परस्य दारान् नलस्य कलत्रम् अनवैतुमेव अपरिज्ञातुमेव । देवाः किल अस्वप्नाः परं मां नलपरिग्रहम्[4] अज्ञातुं तेऽपि निद्रालवो बभूवुः । तथापि तादृशीं[5] माम् इदानीं मम कथनानन्तरमपि[6] [परं] परिग्रहं परिज्ञाय, [ते] कथं स्पृशन्तु । यतः स्वयं दुष्टो[7] अध्वा दुराचार[8] एवार्णवः तस्य नाविकाः । कर्णधाराः । अर्णवस्य कुत्समार्गे पतितम् उद्धरन्ति । स्वयं कथम् अनयं कुर्वन्ति । अथ च सामुद्रो नाविकोऽस्पृश्यो भवति । नौ-द्व्यचष्ठन् (पा० IV.iv.7) इति [9]ठन् ॥३३॥

अनुग्रहः केवल एव मादृशे मनुष्यजन्मन्यपि यन्मनो जने ।
स चेद्विधेयस्तदमी तमेव मे प्रसद्य भिक्षां वितरीतुमीशताम् ॥३४॥

[1] अनुग्रह इति । यत् मादृशे मनुष्यजन्मन्यपि मानुष[2]-मात्रेऽपि जने देवानां मनो वर्त्तते स केवलोऽनुग्रहः एव[3] । चेत् देवैः स अनुग्रहो विधेयः । तर्हि अमी प्रसद्य[4] मे मह्यं तमेव नलं भिक्षां /हो
वितरीतुं दातुम्[5] ईशताम् ईश्वरा भवन्तु ॥३४॥

1 P1 अपीति । 2 P2 असूषुपत् 3 P1 तां; P2 om. मां 4 B नपरिग्रहे 5 BP2 मां तादृशीं 6 P2 add. परमपि 7 B दुष्टस्य अध्वनः 8 B पुरा० 9 B पाठ; P1 पठन् ॥३३॥

1 P1 अनु । 2 P1 मानुष्यमात्रे जनेऽपि 3 BP1 एवं 4 B प्रसह्य 5 P2 om. दातुम् ॥३४॥

अपि द्रढीयः शृणु मत्प्रतिश्रुतं स पीडयेत्पाणिममुं न चेन्नृपः।[1]
हुताशनोद्बन्धनवारिकारितां निजायुषस्तत्करवै स्ववैरिताम् ॥३५॥

अपि[2] द्रढीय इति। त्वं [द्रढीयः][3] दृढतरं[4] मदीयं प्रतिश्रुतं प्रतिज्ञातम् अपि अधुना शृणु। (127b) चेत् यदि स नृपो नलः अमुं मम पाणिं न पीडयेत्। तत्तस्मात् अहं निजस्य आयुषः हुताशनेन कारितां उद्बन्धनेन कारितां वारिणा कारितां च। वह्निम् उद्बन्धनं जले च प्रवेशित्वं स्वेन [स्वस्य] वैरितां आत्मनैव[5] वैरिभावं शत्रुत्वं करवै करवाणि[6]। तस्य भावे [तल्] प्रत्ययः।[7] ममायुषः शत्रून्[8] एतान् पदार्थान् करिष्यामि ॥३५॥

निषिद्धमप्याचरणीयमापदि क्रिया सती नावति यत्र सर्वथा।
घनाम्बुना राजपथेऽतिपिच्छिले क्वचिद्बुधैरप्यपथेन गम्यते ॥३६॥

निषिद्धमपीति[1]। यत्र सती श्रुतिस्मृतिविहिता सदाचारान्विता क्रिया आपदि सत्यां सर्वथा न अवति आत्मानं न रक्षति[2] तत्र पुरुषेण आपद्धर्माभिप्रायेण निषिद्धमपि आत्महननादिकम् आचरणीयम्। अविचिकित्स्यव्याध्यादिना उपसृष्टस्य भृगु-अग्नि-अनशना-म्बुभिर्मरणं विहितम्। तथा नलं विना दुःसहकामसन्तप्तया मया निषिद्धमपि कर्त्तव्यम् [हि]। यतो घनानाम् अम्बुना राजपथे[4] अति-पिच्छिले कर्दमिलत्वेन दुःसञ्चारे क्वचित्प्रदेशे बुधैरपि[5] अपथेन

1 B text नमिमं 2 P अपीति। 3 BP, B2 om. द्रढीयः; edu. add. द्रढीयः 4 B B2 दृढतरं edt. शृणु 5 B2 om. आत्मनैव 6 P, B2 om. करवाणि 7 P स्वस्या॰ 8 P शत्रून् करिष्ये- ॥३५॥ ‖ 1 P निषिद्धमिति। 2 B2 आत्मनो 3 P तस्यस्य 4 P add. पिच्छिले कर्दमिलेऽतिपिच्छिले इति पाठे 5 P om. अपि —

⁶प्रतिषिद्धेन ⁷उन्मार्गेण गम्यते। [लोमादिपामादिपिच्छादिभ्यः शनेलच् (पा॰ V. ii. 100) इतीलच्। राजपथे[8] हीति पाठान्तरम्। राजपथे, इति ऋक्पूरब्धूःपथामानक्षे (पा॰ V. iv. 74) इत्यप्रत्ययः][9] ॥३६॥

स्त्रिया मया वाग्मिषु तेषु शक्यते न जातु सम्यग्वितरीतुमुत्तरम्।
तदत्र मद्भाषितसूत्रपद्धतौ प्रबन्धृतास्तु प्रतिबन्धृता न ते ॥३७॥

स्त्रिया[1] मया इति। मया स्त्रिया तेषु वाग्मिषु देवेषु विषये जातु सम्यक् उत्तरं वितरीतुं न शक्यते। तदत्र अस्यां मम भाषितमेव[2] उत्तरदानमेव सूत्रं तस्य पद्धतौ मार्गे ते तव प्रबन्धृता प्रबन्धकर्तृता अस्तु। न तु प्रतिबन्धृता[3] प्रतिबन्धकर्तृता तव मा भवतु। [सूत्रं हि पद्धत्यां[4] प्रबध्यते]। इदमेवोत्तरं मदीयं, त्वं विचित्रैर्विवरणैः समर्थय[5] ॥३७॥

निरस्य दूतः स्म तथा विसर्जितः प्रियोक्तिरप्याह कदुष्णमक्षरम्।
कुतूहलेनेव मुहुः कुहूरवं विडम्ब्य डिम्भेन पिकः प्रकोपितः ॥३८॥

निरस्य[1] दूत इति। स[2] दूतः प्रियोक्तिरपि प्रियंवदोऽपि तथा [3]तथा निरस्य विसर्जितः सन् कदुष्णम् ईषदुष्णम्[4] अप्रियम्[5] अक्षरं वाक्यम् आह [स्म]। यथा पिकः कोकिलः डिम्भेन बालेन मुहुः कुतू-

6 P. add. न पन्था अपन्थाः वनतैः 7 P. प्रतिषिद्धमार्गेण 8 P. om. राजपथे हीति पाठान्तरम्। 9 P. add. अपथेनेति, पथो विभाषेति (पा॰ V. iv. 62)-ति वा समासान्तः। अर्थान्तरन्यासः ॥३६॥ ॥ 1 P. स्त्रियामिति; P2 स्त्रियेति 2 भाषितं वचनमेव सूत्रम् उक्तम् उत्तरं वा मम सूत्रं 3 P. प्रतिबन्धृता twice 4 P2 प्रकृत्या 5 P. add. अनुप्रासो रूपकं च ॥३७॥ 1 P2 निरस्येति 2 P. om. स 3 P. om. तथा 4 P. om. ईषदुष्णम्; P2 इव दुष्णम् 5 P2 प्रियं —

हल्केन] कुहू कुहू कुहू इति रवं विडम्ब्य अनुकृत्य अनुवदता शता प्रकर्षेण कोपितः सन् प्रियवचनोऽपि कटुक्षाम[6] अमधुरं वदति[7] ।।३८।।

---

अहो मनस्त्वामनु तेऽपि तन्वते त्वमप्यमीभ्यो विमुखीति कौतुकम् ।
क्व वा निधिर्निर्धनमेति किञ्च तं स वा[1] कवाटं घटयन्निरस्यति ।।३९।।

---

अहो[2] मनस्त्वा[3]मिति । अहो आश्चर्यं ते देवाः अपि सन्तः त्वां मानुषीम् अनु लक्ष्य मनस्तन्वते । त्वमपि अमीभ्यः [देवेभ्यः] विमुखी पराङ्मुखीति कौतुकम् । वा अथवा निधिः शङ्खपद्मा[4]धभिधो निर्धनं दरिद्रं प्रति क्व एति । किञ्चाऽन्यत् स दरिद्रः तं निधिम् आगच्छन्तं [कवाटं] कपाटं घटयन् द्वारं पिदधत् सन् निरस्यतीति क्व वा[5] दृष्टम् । अपूर्व-मेतत् तव[6] देवानां[7]मनङ्गीकरणम्[8] ।।३९।।

---

सहाऽखिलस्त्रीषु वहेऽवहेलया महेन्द्ररागाद्गुरुमादरं त्वयि ।
त्वमीदृशि श्रेयसि सम्मुखेऽपि तं पराङ्मुखी चन्द्रमुखि! न्यवीवृतः ।।४०।।

---

सहाऽखिलस्त्रीष्[1]विति । अहं त्वयि विषये महेन्द्रस्य रागात् गुरुम् आद[2]रं वहे । कया समम्? । अन्यासु अखिलास्वपि स्त्रीषु अवहेलया सह । तासु अवज्ञां कुर्वे । त्वं तु हे चन्द्रमुखि । ईदृशि

---

6 P2 मधुरं 7 P1 ब्रवीति; and add. अनुप्रासो विरोध उपमा च ।।३८।।
1 P2 text कपाटं 2 P1 अहो; P2 अहो इति । 3 B स्वा° 4 P2 °पद्माभिधो 5 P2 चा 6 B त्वया 7 P1 P2 देवमा° 8 P1 add. कं शिरः पाटयति प्रविशन्तं कवाटो द्वारपदः । जपादित्वात् वत्वम् । तथा च ऊषं गच्छति जवाज्जवाकुणां वारुणी मरुणसारथिर्विभाति ? गति भ(ज)वेति प्रयोगः । अनुप्रासो विषमो दृष्टान्तश्च ।।३९।। 1 P2 सहेति । 2 P1 om. आदरं

श्रेयसि इन्द्राधित्वलक्षणे कल्याणे सम्मुखेऽपि सति पराङ्मुखी सती [तम्] आदरं न्यवीवृतः। [केचिद्व्याचक्षते - त्वम् इन्द्रं न्यवीवृतः] निषिद्धवती[3] ॥ ४०॥

---

दिवौकसं कामयते न मानवी नवीनमश्रावि तवाननादिदम्।
कथं न वा दुर्ग्रहदोष एष ते हितेन सम्यग्गुरुणाऽपि शाम्यते[1] ॥ ४१॥

---

दिवौकसमिति[2]। मानवी स्त्री दिवौकसं देवं न कामयते। इदं तव आननात् नवीनम् अपूर्वं मया अश्रावि। वा अथवा एष ते तव[3] दुष्टो ग्रहः [आग्रहः] एव दोषः सम्यक् हितेन ~~[struck]~~ गुरुणा[ऽपि] पित्राऽपि कथं न शाम्यते[4]। अथ च दुष्टस्य शनैश्चरादिग्रहस्य दोषः आवेशो हितेन गुरुणा [अनुकूलेन बृहस्पतिना शाम्यते। अथवा] उपशाम्यते[5] शान्तिकादिना[6] ॥ ४१॥

---

अनुग्रहादेव दिवौकसां नरो निरस्य मानुष्यकमेति दिव्यताम्।
अयोविकारे स्वरितत्वमिष्यते कुतोऽयसां सिद्धरसस्पृशामपि ॥ ४२॥

---

अनुग्रहादिति[1]। नरो मनुष्यः दिवौकसाम् अनुग्रहमात्रादेव मानुष्यकं निरस्य त्यक्त्वा दिव्यताम् एति। अयसां लोहानां सिद्धरसस्पृशां रसस्पर्शेन सुवर्णभूतानामपि कुतः कथम् अयोविकारे[2] स्वरितत्वं लोहविकारशब्दवाच्यत्वम् इष्यते। अपि तु सुवर्णमेव भण्यते, न तु लोहम् ॥ ४२॥

---

3. add: अनुप्रासः सहोक्तिः काव्यलिङ्गं च ॥ ४०॥ 1. L2 text शम्यते 2. दिवौकस इति 3. om. तव 4. L2 शम्यते 5. L2 उपशम्यते 6. add. अनुप्रासो हेतुः श्लेषो विभावना च विशेषोक्तिश्च ॥ ४१॥ 1. B ऽग्रहादेवि 2. B ऽविकार — ॥ ४२॥

हरिं परित्यज्य नलाभिलाषुका न लज्जसे वा विदुषिब्रुवा कथम् ।
उपेक्षितेक्षोः करभाच्छमीरताद्गुरुं वदे त्वां करभोरु ! भो इति ॥४३॥

---

हरिं परित्यज्य[1] इति । वा अथवा त्वं[2] हरिम् इन्द्रं परित्यज्य नले[3] अभिलाषुका सती कथं न लज्जसे । किंभूता ? । विदुषीमात्मानं ब्रूते विदुषिब्रुवा । [4]अस्यन्तविहिताया नद्याः, [ऋदुदित्तरतमरूप[5]कल्प-चेलड्ब्रुवगोत्रमतहतेषु ङ्यो ह्रस्वः [च] (सि° है° III.ii.63)] [घरूपकल्प-चेलड्ब्रुव (पा° VI.iii.43) [6]इत्यादि पाणिनीयम्] । अथवा निन्द्या विदुषी विदुषिब्रुवा । हे भोः[7] करभोरु इति कारणात् अहं त्वां करभाद्गुरोरपि उरुं गुरुतरां मूर्खां वदे ज्ञानपूर्वकं वदामि । [अथवा करभाद्गुरुं त्वां करभोरु भो[8] इति वदे । इतिशब्देन करभोरु[9] इति एतदनुकृतम् । अतो विधेयभावः] । किंभूतात् ? । शमी[10]पत्रेषु रतात् भक्षणप्रवृत्तात् तथा उपेक्षित इक्षुदण्डो येन[11] तस्मात्तथा । मधुरमिक्षुरसं त्यक्त्वा यः कटुतरां[12] [कण्टकिनीं] शमीमत्ति । अतः करभाद्गुरुः । मणिबन्धकनिष्ठिकयोर्मध्यविभागोऽपि करभः स्यात् । करभवत् ऊरू यस्याः तस्याः सम्बोधनम्[13] । ऊरूत्तरपदादौपम्ये (पा° IV.i.69) इत्यूङ् । हे करभोरु । अनुक्रमवर्तुलोरु । इत्थमुपमानेन अन्यासु स्त्रीषु करभोरुशब्दः कविभिः प्रयुज्यते । त्वयि तु पूर्वोक्तेनाभिप्रायेणाहं प्रयुञ्जे । ज्ञानयत्नौपच्छन्दनेषु [वद (का° III.ii.44) इति] वदेरात्मनेपदम् । [14]भासनोपसम्भाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः (पा° I.iii.47) इति पाणिनीयम् ॥४३॥

---

1 P1, P2 हरिमिति । 2 B तं 3 P1 नला°; P2 नलम् 4 P1 घरूप... etc. here; and add. त्रिलोचनकृत 5 P2 om. °रूप° 6 P1 इत्यादिना ह्रस्वः 7 P2 om. भोः 8 P2 om. भो 9 P2 add. भो 10 P1 शमीकण्टक°; P2 °पत्रेषु कण्टकेषु च ॥ P2 add. तत 12 P1 om. कटुतरां 13 P1 add. क्रियते 14 P2 °भासनोपेति पाणिनीयम् ॥४३॥

सर्ग ९ 24

~~विहाय हा सर्वसुपर्वनायकं त्वया धृत:[1] किं नरसाधिमभ्रम:।~~
मुखं विमुच्य श्वसितस्य धारया वृथैव नासापथधावनश्रम:॥४४॥

---

विहाय[2] हा सर्वेति। हा इति खेदे। त्वया सर्वेषां सुपर्वणां देवानां नायकम् इन्द्रं विहाय किं नरे[3] मानुषे साधिम्न: साधुत्वस्य भ्रम: भ्रान्ति: धृत: कथं कृत:? यथा श्वसितस्य निःश्वासस्य धारया प्रवाहेण मुखं विमुच्य वृथा नासा(२४b)[4]यां नासिकाया पथा मार्गेण धावनस्य[5] वहनस्य श्रम: ध्रियते। मुखं पिधाय नासिकाद्वारेण[6] वृथा श्वासं यथा कश्चिन्मुञ्चति तादृशं तव चेष्टितम् इति। आदृत इति वा पाठ:॥४४॥

---

तपोनले जुह्वति सूरयस्तनूर्दिवे फलायाऽन्यजनुर्भविष्णवे।
करे पुन: कर्षति सैव विह्वला बलादिव त्वां वलसे न बालिशे॥४५॥

---

तपोनले[1] इति। सूरयो विद्वांस: तनू: शरीराणि तप एवाऽनलो वह्निस्तत्र जुह्वति तपस्यन्ति। किमर्थम्? दिवे स्वर्गलक्षणाय फलाय[2]। किंभूताय? अन्यस्मिन् जनुषि जन्मान्तरे भविष्णवे[3]। सैव द्यौ: पुन: त्वां विह्वला सती[4] बलादिव बलात्कारेण करे हस्ते कर्षति। अस्मिन्नेव जन्मनि आकारयति। त्वं हे बालिशे![5] मूर्खे। न वलसे न[6] व्यावर्त्तसे। अथ च त्वं तपोरूपे धर्मात्मनि नले शरीरं ददासि। तत्राऽपि पतिव्रता[7]फलं स्वर्ग:। स तु तव इहैवाऽस्ति। तप: परं कृतयुगे ( ? ) इति

---

1 P2 text ०द्दत: 2 P1 P2 विहायेति। 3 P1 नरमानुषे 4 P2 नासा 5 P2 धावस्य 6 P2 add. वृथाद्वारेण —॥४४॥ 1 P1 तप इति। 2 P2 om. फलाय 3 P1 add. द्युविशेषणं वा 4 P2 बलादिव बलात्कारेण add. कर्षति 5 P1 add. हे 6 P1 om. न 7 P1 ०व्रतात्वं

~~तपः प्रधानत्वात् तस्य, इति लेशमात्रः[8] ॥७५॥~~

यदि स्वमुद्बन्धुमना[1] विना नलं भवेर्भवन्तीं हरिरन्तरिक्षगाम् ।
दिविस्थितानां प्रथितः पतिस्ततो हरिष्यति न्याय्यमुपेक्षते हि कः ॥७६॥

यदि स्वमुद्बन्धुमना[2] इति । यदि त्वं नलं विना स्वम् उद्बन्धुमना[3] भवेः उद्बन्धनेन मर्तुमिच्छसि । ततः भवतीम् अन्तरिक्षगां जायमानां हरिरिन्द्रो हरिष्यति । यतः स दिवि आकाशे स्थितानां सर्वेषां प्रथितः[4] प्रसिद्धः पतिः । हि यस्मात् न्यायादागतं वस्तु कः उपेक्षते । उद्बन्धनमरणे हि भूमौ चरणस्पर्शाभावात् आकाश एव स्थितिः । धर्मपथ्यर्थन्यायादनपेते (पा० IV. iv. ९२) इति यः[6] ॥ ७६॥

निवेक्ष्यसे यद्यनले नलोज्झिता सुरे तदस्मिन्महती दयाऽऽहृता ।
चिरादनेनार्थिनयाऽपि[4] दुर्लभं स्वयं त्वयैवाऽङ्गमर्प्यते ॥७७॥

निवेक्ष्यसे[2] इति । यदि त्वं नलेन उज्झिता सती अनले वह्नौ निविक्ष्यसे । तत् अस्मिन् सुरे[3] कृशानुलक्षणे त्वया महती दया आहृता । यत्[4] यस्मात् त्वयैव स्वयम् अङ्गमर्प्यते । किंभूतम् ? । चिरात् अनेन वह्निना अर्थिनयाऽपि दुर्लभम्[6] । अङ्ग[7] हे ! । नेर्विशः (पा० I. iii. 17) इत्यात्मनेपदम् । न लोकाव्यय (पा० II. iii. ६९) इत्यादिना षष्ठीप्रतिषेधः[5] ॥७७॥

8 P1 add. अनुप्रासः काव्यलिङ्गम् उत्प्रेक्षा च ॥७५॥ 1 P2 text एव 2 P1 P2 यदीति । 3 P1 उद्बन्धने 4 P1 om. प्रथितः 5 P1 add. द्युशब्दः स्वर्गेऽन्तरिक्षे च श्लिष्टः । 6 P1 add. अनुप्रासः काव्यलिङ्गम् अर्थान्तरन्यासश्च ॥७६॥
1 P2 text नलि० 2 P2 om. इति 3 P1 om. सुरे 4 P2 om. यत् 5 P1 add. अर्थित्वेनाऽपि; P2 add. अर्थिनयाऽपि 6 P1 add. अप्राप्यम् 7 P1 om. अङ्ग हे — ॥७७॥

सर्ग ९ 26

जितं जितं तत्खलु पाशपाणिना विना नलं वारि यदि प्रवेक्ष्यसि ।
तदा त्वदाख्यान् बहिरप्यसूनसौ पयःपतिर्वक्षसि वक्ष्यतेतराम् ॥४८॥

जितं[1] जितमिति । खलु नलं पाशपाणिना वरुणेन जितं जितं[2] यदि त्वं नलं विना वारि प्रवेक्ष्यसि, तदा असौ पयसां पतिः त्वदाख्यान् असून् प्राणान् बहिरपि आलिङ्गनादिना वक्षसि[3] हृदये वक्ष्यतेतरां धारयिष्यते[4] । त्वमेव तस्य जीवितम् अन्तर्गतं पश्चाद्बहिरपि साक्षाद्देवत्वम् ॥४८॥

करिष्यसे यत्नत एव दूषणादुपायमन्यं विदुषीति मृत्यवे ।
प्रियाऽतिथिः स्वेन गता गृहात् कथं न धर्मराजं चरितार्थयिष्यसि ? ॥ ४९॥

करिष्यसे इति । यदि त्वम् अत एव इन्द्रानलवरुणवरणभयात्[2] दूषणात् मृत्यवे अन्यं कञ्चित्[3] उपायं करिष्यसे । कथम् ? इति । इतीति किम् ? । यतस्त्वं विदुषी उपायज्ञा । विदुषी तु[4] इति पाठान्तरम् । ततः कथं त्वं धर्मराजं [न] चरितार्थयिष्यसि[5] ? (२९०) किंभूता ? स्वेनैव[6] [वा]-त्मनैव प्रिया अतिथिः सती तस्य गृहात् गता । सर्वोपायैर्मरणे यमगृहप्राप्तिर्भवति । इत्थं तस्य वृण्वतो दूषणमपि नास्ति, धर्मराजत्वात् ॥४९॥

निषेधवेषो विधिरेष तेऽथवा तवैव[1] युक्ता खलु वाचि वक्रता ।
विजृम्भितं यस्य किल ध्वनेरिदं विदग्धनारीवदनं तदाकरः ॥५०॥ यि

निषेधवेष[2][3] इति । अथवा ते[4] तव एष निषेधवेषो विधिः

1 Pl2 जितमिति 2 Pl om. जितं 3 B वक्ष्यसि 4 B धयिष्यति — ॥४८॥ 1 Pl2 +स्य तु 2 Pl2 om. वरण° 3 Pl2 किञ्चित 4 Pl2 om. तु 5 B ~~चरितार्थ~~ चरितार्थयसि 6 Pl om. एव — ॥४९॥ 1 Pl2 +ext तवैव 2 Pl2 निषेधेति 3 B वेषोऽपि 4 Pl एष ते तव —

निषेधद्वारेण इन्द्रादीनामङ्गीकरणविधिः खलु यस्मात् वाचि विषये वक्रता वक्रोक्तिः। [5]तथैव विधिप्रधाना [6]एव युक्ता। [तवैवेति पाठान्तरम्]। किल यस्मात् यस्य ध्वनेर्व्यङ्ग्यस्य इदं निषेधे वाच्ये विधिरूपं विजृम्भितं तस्य निषेधद्वारकविधेः विलसितस्य विदग्धायाः नार्याः वदनम् [7]आकरः खनिः। त्वयि विदग्धत्वात् एतत्सम्भवति। यथा —

निःशेषच्युतचन्दनं स्तनतटं [8]निर्मृष्टरागोऽधरो नेत्रे दूरमनञ्जने पुलकिता तन्वी [9]तवेयं तनुः। मिथ्यावादिनि! दूति! बान्धवजनस्याज्ञातपीडा[10]गमे वापीं स्नातुमितो गताऽसि [11]न पुनस्तस्याधमस्यान्तिकम् (का॰प्र॰ I-3)

(अमरु-61)॥ अत्र तदन्तिकमेव रन्तुं गताऽसीति [12]व्यज्यते। केचित्तु एव-मप्याहुः — त्वं सुन्दरो [13]न इत्युक्ते [14]निषेधः। त्वं [15]किं न सुन्दर इत्युक्ते ध्वनिविशे[16]षेणाऽपि तु सुन्दरः इति प्रतीतिर्वक्रोक्त्या ॥५०॥

---

भ्रमामि ते भैमि! सरस्वतीरसप्रवाहचक्रेषु निपत्य कत्यदः।
त्रपामनादृत्य मनाक् कुरु स्फुटं कृतार्थनीयः कतमः सुरोत्तमः ॥५१॥

---

[1]भ्रमामि ते इति। हे भैमि! अहं ते तव सरस्वतीरसप्रवाह-चक्रेषु वाण्या रसो माधुर्यादिः तस्य प्रवाहो नैरन्तर्यं ~~[illegible]~~ तस्य चक्रेषु ~~[illegible]~~ वक्रोक्तिषु निपत्य कति कियत् [2]यावत् भ्रमामि। कतीति क्रिया-विशेषणम्। कालाध्वनोरत्यन्तसंयोगे द्वितीया (पा॰ II।iii।5) इति[3]। अथ च सरस्वतीनदीजलप्रवाहावर्ते पतितः को न भ्राम्यति चक्रवत्[4]। त्वं त्रपाम् अनादृत्य त्यक्त्वा मनाक् स्फुटं प्रकटम् अदः कुरु [5]वद। त्वया कतमः सुरोत्तमः

---

5 P2 यथैव 6 P1 add. या 7 P1 आकार! 8 B निर्मृष्ट॰; P2 निर्मिष्ट॰ 9 B यथेयं; P1 तथेवं 10 P1 P2 पीडागमा 11 P2 गाता न 12 P2 व्यङ्ग्यम् 13 P2 om. न 14 P1 om. निषेधः... इत्युक्ते 15 P2 किं त्वं 16 P1 ॰निविशेषेणा॰ — ॥५०॥ 1 P1 भ्रमा/: भ्रमामीति; P2 भ्रमामीति। 2 P1 यावान् कति वारान् वा; P2 om. यावत् 3 P1 add. वा 4 P1 om. चक्रवत् 5 P2 om. वद

सर्ग ९ 28

~~किरातार्जुनीयः[6] ॥ ५१ ॥~~

मल: किमैरावतकुम्भकैतवप्रगल्भपीनस्तनदिग्धवस्तव ।
सहस्रनेत्रान्न पृथग्मते मम त्वदङ्गलक्ष्मीमवगाहितुं क्षमः ॥ ५२ ॥

[1] मल: किमैरावतेति । तव किम् ऐरावतस्य कुम्भयोः कैतवेन प्रगल्भौ कठिनौ [2] पीनौ च स्तनौ यस्या दिशः तस्या धवो भर्त्ता पूर्वदिक्पालो महेन्द्रो मतः ? । [मतिबुद्धिपूजार्थेभ्यश्च क्तः (पा० III. iii. 1), क्तस्य च वर्त्तमाने (पा० II. iii. 67) इति षष्ठी ] । यतो मम मते सहस्रनेत्रात् पृथक् अन्यः कश्चित् तव अङ्गानां लक्ष्मीम् अवगाहितुं विवेक्तुं न क्षमः इति [3] ममाभिप्रायः[4] ॥ ५२ ॥

प्रसीद तस्मै दमयन्ति ! सन्ततं त्वदङ्गसङ्गप्रभवैर्जगत्प्रभुः ।
पुलोमजालोचनतीक्ष्णकण्टकैस्तनुं घनामातनुतां स कण्टकैः ॥ ५३ ॥

[1] प्रसीद तस्मै इति । हे दमयन्ति ! त्वं तस्मै इन्द्राय प्रसीद । स जगतां प्रभुः [ सन्ततं ] तव अङ्गानां सङ्गात् प्रभवैः कण्टकैः रोमाञ्चैः तनुं शरीरं घनां निबिडाम् आतनुताम् । किंभूतैः ? । पुलोमजाया इन्द्राण्याः लोचनयोः तीक्ष्णकण्टकसदृशैः । प्रथमश्लोके पीनस्तनदिक्-[2] नामग्रहणात्, अत्र च पुलोमजाभिधानाच्च गूढं सपत्नीसूचनम्[3] ॥ ५३ ॥

6 P. add. अनुप्रासो हेतुश्च ॥ ५१ ॥
1 P, P2 मल इति । 2 P2 om. पीनौ 3 P2 साभिप्रायः 4 P. add. ओजो गुणोऽ-
नुप्रासोऽपह्नुतिः समासोक्तिश्च ॥ ५२ ॥
1 P, P2 प्रसीदेति 2 P2 स्तनं 3 P. add. अनुप्रासो रूपकं च ॥ ५३ ॥

अबोधि तत्त्वं दहनेऽनुरज्यसे स्वयं खलु अत्रियगोत्रजन्मनः ।
विना तमोजस्विनमन्यतः कथं मनोरथस्ते वलते विलासिनि ॥५४॥

---

अबोधि[1] तत्त्वमिति। मया तत्त्वं परमार्थस्तवाऽबोधि ज्ञातः। त्वं [स्वयं खलु निश्चितं[2]] दहने वह्नौ अनुरज्यसे। कस्मात्?[3] अत्रियगोत्रजन्मनः उत्पत्तितः सकाशात् हेतोः। हे विलासिनि! तम्[4] ओजस्विनमग्निं विना अन्यतः अन्यस्मिन् पुरुषे ते मनोरथः कथं[5] वलते[6]॥५४॥

---

त्वयैकसत्या तनुतापशङ्कया ततो निवर्त्यं न मनः कथञ्चन ।
हिमोपमा तस्य परीक्षणक्षणे सतीषु वृत्तिः शतशो निरूपिता ॥५५॥

---

त्वयैकसत्या[1] इत्यादि। त्वया एकया एव सत्या साध्व्या तनोः शरीरस्य तापशङ्कया ततो दहनात् कथञ्चन मनो न निवर्त्यम्। यतः तस्य वह्नेः शतशः अनेकवारं सतीषु पतिव्रतासु परीक्षण-[2]क्षणे[3] सहगमनाग्निगमनकालेषु[4] च हिमोपमा शीतला वृत्तिः निरूपिता। तदाग्नेः शैत्यं दृष्टम्। अत्राऽपि दहनपदेन सूचितम् औष्ण्यं केवलम् अनभिमतं सूचयति॥५५॥

---

स धर्मराजः खलु धर्मशीलया त्वयाऽस्ति चित्ताच्छिथिलामवापितः।
ममाऽपि साधुः प्रतिभात्ययं क्रमश्चकास्ति योऽनैव हि योग्यसङ्गमः॥५६॥ (ये

---

1 P1 P2 अबोधीति। 2 P2 om. निश्चितं 3 P1 add. खलु 4 P1 त्वं 5 P2 add. न 6 BP1 चलते ॥५४॥

1 P1 om. त्वयैकसत्या इति। 2 P2 परीक्षणे 3 P1 P2 add. एकाचिति पृथक्-चितिविषयेषु 4 P2 om. आग्निगमन० —— ॥५५॥

सर्ग ९ 30

स[1] धर्मराज इति। स्वकु[?] त्वया स[2] धर्मराजः[3] चित्तस्याऽ-
तिथितामवापितः। यतो धर्मशीलया[4] त्वया अयं कामो यमादपि साधु-
र्युक्तः प्रतिभाति। हि यतः योग्येन सह[5] योग्यस्य सङ्गमः[6] सम्बन्धः श्लाघ्यो-
ऽस्ति। अथ च तस्य धर्मप्रधानत्वात् कामप्रधानायास्तव अनभिरुचिरिति
सूचयति ॥५६॥

अजातविच्छेदलवैः स्मरोत्सवैरगस्त्यभासा दिशि निर्मलत्विषि।
धुता[1]वधिं कालममृत्युशङ्कितो निमेषवत्तेन नयस्व केलिभिः ॥५७॥

अजातविच्छेदेति[2]। त्वं तेन मृत्युना सह धुतो निषिद्धोऽ-
वधिर्मर्यादा यस्य कालस्य तं तथाविधम् आचन्द्रार्ककालं निमेष-
वत् क्षणमिव स्मरोत्सवैः केलिभिः क्रीडाभिर्नयस्व। किंभूता? न मृत्योः
शङ्किता मरणभयरहिता। किंभूतैः स्मरोत्सवैः? न जातो विच्छेदस्य
वियोगस्य लवो लेशोऽपि येषु तैस्तथा[3]। क्व? अगस्त्यस्य भासा
निर्मलत्विषि दिशि। स्वरितञितः[4] कर्त्रभिप्राये क्रियाफले (पा० I.iii.72)
इत्यात्मनेपदम्। सम्माननो (पा० I.iii.36) इत्यादिषु नयतकर्त्रभिप्रायार्थ
आरम्भः।[5] दक्षिणाशापतित्वात् यमस्य सपत्नीसूचनम्। लोकमारकत्वं[6] च॥५७॥

शिरीषमृद्वी वरुणं किमीहसे पयःप्रकृत्या मृदुवर्गवासवम्।
विहाय सर्वान् वृणुते स्म किं न सा दिशाऽपि शीतांशुमनेन हेतुना ॥५८॥

1 P1 सेति। 2 P1 om. स 3 B °राजा; P1 °राज; P2 °राजो 4 B °शीलस्त्वया
5 P2 सह सङ्गमः योग्यसङ्गमः 6 B सम्बन्धः सङ्गमः 7 P1 धर्मराज°—॥५६॥

1 P2 + च्युता° 2 P1 अजातेति। 3 P2 ते तथा 4 P1 स्वरिच्चिञि°; P2
स्वरितः 5 B वरुणलोके..... मृदुत्वम् of IX.58, here. 6 P1 मारणं च॥मा
॥५७॥

शिरीषमृद्वीति[1] त्वं किं वरुणम् इच्छसे । यतः शिरीष[2]कुसुमवत् मृद्वी[3] कोमला त्वम् । किंभूतं तम्[4] ? । पयसः प्रकृत्या[5] समस्तस्य मृदुवर्गस्य[6] कोमलपदार्थव्रजस्य वासवम् अधिपतिम् । वरुणो हि पयसां प्रकृतिभूतः, पतित्वात्[7] । कोमलं च सर्वं पयसः उत्पद्यते । अतः साक्षात् परम्परया च[8] स एवेश्वरः । वरुणलोके हि सर्वाण्यपि शरीराणि अयोनिजानि[9] । द्रवैकस्वभावाभिरुपादानकारणभूताभिरद्भिरारब्धान्यतिमृदूनि, निमित्तकारणस्य पार्थिवावयवानां[10] संयोगाच्चो[11]पभोगसमर्थानि । तदुक्तं — तत्र शरीरमयोनि[12]जमेव वरुणलोके । पार्थिवावयवोपष्टम्भाच्चो[13]पभोगसमर्थम् ( ) इति । तत्रेति[14] शरीरेन्द्रियविषयसंज्ञकोपकार्यत्रये इत्यर्थः ।[15] अथवा[16] प्रकृतित्वेन पयो मृदुवर्गस्य वासवमिति[17] पयस एव विशेषणम् । वरुणस्य च[18] पयसः पतित्वात् किं वाच्यं मृदुत्वम् ? ।

किं सा[19] निशापि अनेनैव हेतुना सर्वान् सुन्दरानपि विहाय शीतांशुं चन्द्रं न वृणुते स्म । अथ चात्रा[20]ऽपि केवलं शैत्यमेवाऽस्ति । न पित्तगन्धोऽस्ति । कामीच्च पित्तप्रधानो नारीणां रुचितो भवतीति । निशाशब्दः णिशि (1097) — चुम्बने [धातोः[21]] — चुम्बनप्रधानायाः शैत्यमेवाऽभिमतं, न तु सुरतप्रधानायाः । स च शीतकिरणः । अत्र यद्यपि दूतधर्मे[22] स्थितो नलो बुद्धिपूर्वकं न वदति । परं भवितव्यतावशात् तन्मुखात् ईदृशैः अनभिरुचिव्यञ्जकैः शब्दैः बलाद्वाणी निर्गच्छति इति कविरपि अलङ्कारमुखेनाऽभिप्रायं सूचितवान् ॥ ५९ ॥

1 B शरीष°; P. शिरीषेति । 2 B शरीष° 3 P2 कोमला मृद्वी 4 P. om. तं 5 P. add. पयः प्रकृतित्वेन 6 P. add. कोमलवर्गस्य 7 P. add. पयः प्रकृतिरश्मयश्च 8 B P2 om. च 9 P2 अयोनि 10 P. P2 पार्थिवानां 11 P. °योग° 12 P2 शरीरयोनि° 13 P. सोप° 14 P. तपति 15 P. add. स च इति पाठस्तत्र 16 P2 add. पयो 17 P. वासव इति 18 P. om. च 19 P2 om. सा 20 P. चक्रेऽपि ; P2 चाऽत्राऽपि 21 P. धातोः twice 22 B °धर्मे — ॥ ५९ ॥

सर्ग ९ 32

~~असेवि यस्त्यक्तदिपा दिवानिशं श्रियः प्रियेणानणुरामणीयकः।~~
सहाऽमुना तत्र पयःपयोनिधौ कृशोदरि! क्रीड यथामनोरथम्॥५९॥

---

असेवि य[1] इति। हे कृशोदरि! त्वम् अमुना वरुणेन सह तत्र पयसो दुग्धस्य पयोनिधौ यथामनोरथं क्रीड। (यथाऽसादृश्ये (पा० II.1.7) इति अव्ययीभावः। यथार्थे यदव्ययमिति सिद्धे सादृश्यप्रतिषेधार्थं वचनम्। योग्यतावीप्सापदार्थानतिवृत्तिः सादृश्यं चेति यथार्थाः।) यः समुद्रः दिवानिशं श्रियः प्रियेण श्रीकृष्णेन त्यक्तदिवा[2] त्यक्तद्युलोकेन असेवि। किंभूतः? अनणु प्रचुरं रामणीयकं यस्य स तथा[3]॥५९॥

---

इति स्फुटं तद्वचसस्तयाऽऽदरात् सुरस्पृहारोपविडम्बनादपि।
कराङ्कसुप्तैककपोलकर्णया श्रुतं च तद्भाषितमश्रुतं च तत्॥६०॥

---

इति[1] स्फुरमिति। तया इति स्फुटम्[2] अहं मन्ये। तस्य नलस्य वचसः आदरात् तस्य दूतस्य भाषितं श्रुतं च। तथा[3] तत् अश्रुतं च। तेषामनङ्गीकरणात्। कस्मादश्रुतं च? सुरेषु विषये यः स्पृहाया आरोपः तस्य विडम्बनादपि विगोपकाच्च अश्रुतं च। किंभूतया[4]? कराङ्के हस्ततले सुप्तः एकः कपोलः कर्णश्च यस्याः तया तथा॥६०॥

---

चिरादनध्यायमवाङ्मुखी मुखे ततः स्म सा वासयते दमस्वसा।
वतायतश्वासविमोक्षणाऽथ तं क्षणाद्बभाषे करुणं विचक्षणा॥६१॥

---

1 P. असेवि। 2 B त्यक्तदिपा twice; P. दिवात्यक्त 3 P. add. अनुप्रास उदात्तम्। रुद्रमते अवसरः॥५९॥

1 P. इतीति 2 P. add. स्फुटं 3 P. om. तथा....कस्मादश्रुतं च? M B P किं भूतया?॥——॥६०॥

चिरादनध्यायमिति[1]। ततः सा यमस्वसा निजमुखे चिरादनध्यायं मौनं वासयते स्म॥ [अण्यन्तकर्तुः अनध्यायस्य चित्तवत्त्वाभावे अणावकर्मकाच्चित्तवत्कर्तृकादि[2](पा० १।३।८८)त्यादिना[3] परस्मैपदप्राप्ते[4], णिचश्चे[5](पा० १।३।७४)त्यात्मनेपदम्। न पादम्याङ्यमि[6](पा० १।३।८९)त्यादि न वाच्यम्] अवाक् अधो मुखं यस्याः सा तथा। किंभूता? कृतम् आयतस्य श्वासस्य विमोक्षणं यया सा तथा। [7]उद्दण्डे वायौ वाति[8] सति तात्कालिकोऽनध्यायः स्मृतिशास्त्रे दृष्टः। अथ श्वासनिवृत्तौ [सत्यां] क्षणात् करुणं दीनं बभाषे। यतः विचक्षणा ॥६१॥

---

विनिन्दता दुष्कृतिनीं मम श्रुतिं दिगिन्द्रदुर्वाचिकसूचिसञ्चयैः।
प्रयातजीवामिव मां प्रति स्फुटं कृतं त्वयाप्यन्तकदूततोचितम् ॥६२॥

---

विनिन्दतेति[1]। हे दूत! [2]त्वयाऽपि अन्तकस्य यमस्य दूततायाः उचितं कृतम्। कां प्रति? मां प्रति। किंभूताम्? प्रयातो गन्तुमारब्धो जीवो यस्याः तां तथाभूतामिव [प्रमृतामिव]। किं कुर्वता? दिगिन्द्राणां यानि दुष्टानि वाचिकानि सन्देशास्त एव सूचिसञ्चयास्तैः [दुष्कृतिनीं[3]] जन्मान्तरदुष्कृतयुक्तां मम श्रुतिं कर्णेन्द्रियं [विनिन्दता[4]]। यमदूतोऽपि आकारयन् श्रवणकठोरं वदति। मानुषं गतसत्त्वं च कुरुते। स्फुटं शङ्के ॥६२॥

---

त्वदास्यनिर्यन्मदलीकदुर्यशोमषीमयं सल्लिपिरूपभागिव।
श्रुतिं ममाविश्य भवदुरक्षरं सृजत्यदः कीरवदुत्करा रुजः ॥६३॥

---

1 P. चिरादिति। 2 P. ०कर्मकादित्यादि 3 P2 इति 4 P2 ०पदाभावे 5 P. णिचश्चे० 6 P. पादम्यत्व० 7 P. उद्दण्ड० 8 P. om. वाति — ॥६१॥ 1 B विभिन्द०; P. विभिन्दतामिति। 2 P. add. तत 3 B P2 om. दुष्कृतिनीं; eds. add दुष्कृतिनीं 4 B भिन्दता; P. भिन्दतां; P2 भिन्दता — ॥६२॥

सर्ग ९ 34

त्वदास्यनिर्यदिति[1]। अदः भवदीयं दुर्वाचिकाक्षरं मम श्रुतिम् आविश्य कीटवत्[2] उत्करा रुजः पीडाः सृजति। ननूच्चरित-प्रध्वंसित्वेनाऽक्षरस्याऽस्थायित्वात् कथं पीडाकर्तृत्वमित्याह- किंभूतम्? । त्वदास्यात् निर्यत् निर्गच्छत् यत् मदीयम् अलीकम् अविद्यमानं दुर्यशः अकीर्तिः तदेव मषी तन्मयम् (उत्प्रेक्षते-सत् प्रधानं विद्यमानं लिपेर्लेखनस्य रूपं भजते तद्वाक् इव मूर्तिवदिव। तत्कर्ण[3]-प्रविष्टं पीडां कुरुते। [सम्प्रोदश्च कटच् (पा० V। ii। २९) इति कटच्]॥ ६३॥

तमालिरूचेऽथ विदर्भजेरिता प्रगाढमौनव्रतयैकया सखी।
त्रपां समाराधयतीयमन्यया भवन्तमाह स्वरसज्ञया मया॥६४॥

तमालिरूचे इति[1]। अथ विदर्भजया ईरिता सती काचिदालिः सखी तं दूतम् ऊचे- इयमस्माकं सखी दमयन्ती (132b) एकया निजया रसज्ञया जिह्वया त्रपां समाराधयति। अन्यया मया द्वितीयया स्वस्य रसज्ञया जिह्वया, अथ च स्वभावज्ञया च भवन्तम् आह। मम पार्श्वात् त्वां वादयति॥६४॥

तमर्चितुं मद्वरणस्रजा नृपं स्वयंवरः सम्भविता परेद्यवि।
ममाऽसुभिर्गन्तुमनाः पुरःसरैस्तदन्तरायः पुनरेष वासरः॥६५॥

तमर्चितुं मदिति[1]। परेद्यवि[2] परस्मिन्नहनि तं नृपं नलं मम वरणस्रजा। [तदिति पाठे तस्य वरणाय स्रक् तद्वरण-स्रक् तया[3]] मालया अर्चितुं स्वयंवरः [सम्भविता] सम्भविष्यति।

1 I. त्वदिति। 2 B कीटकम् 3 B ६२; I. ६०.-॥६३॥ 1 I. तमिति।; I2 तमालिरिति। 2 B ०ज्ञाया-॥६४॥ 1 I. तमिति।; I2 तमर्चितुमिति। 2 B I. I2 परस्मिन्नहनि परेद्यवि 3 I2 add मदिति पाठे मम सम्बन्धिन्या वरणस्रजा.... सम्भविष्यति।

सर्ग ९ 35

पुनः एष अद्यतनो वासरः तस्य अन्तरायः विघ्नरूपः। किंभूतः ⁴। मम असुभिः सह गन्तुमनाः। किंभूतैः ⁴। पुरःसरैः। मम प्राणैः सह अयं दिवसो गन्ता। सद्यः परुत्परार्यैषमः परेद्यव्यद्य (पा० V।।।। 22) इत्यादिना निपातः ॥६५॥

---

तदद्य विश्राम्य दयालुरेधि मे दिनं निनीषामि भवद्विलोकिनी।
नखैः किलाऽऽख्यायि विलिख्य पक्षिणा तवैव रूपेण समः स मत्प्रियः॥६६॥

---

¹तदद्य विश्रम्येति। तत् त्वम् अद्य विश्राम्य स्थित्वा मे मम दयालुः एधि भव। अहं भवन्तं ²विलोकयन्ती सती अद्यतनं दिनं निनीषामि। स मम प्रियः किल पक्षिणा ³हंसेन तवैव रूपेण समः सदृशः नखैः विलिख्य लिखित्वा आख्यायि। त्वत्सदृश एव नलः कथितः। [तुल्यार्थैरि— (पा० II।।। 72) ⁴इत्यादिना तृतीया]॥६६॥

---

हृशोर्द्वयी ते विधिनाऽस्ति वञ्चिता मुखस्य लक्ष्मीं तव यन्न वीक्षते।
असावपि स्वस्त्वदिमां नलानने ~~विलिख्य~~ साफल्यमुपैतु जन्मनः॥६७॥
विलोक्य

---

~~¹दृशोर्द्वयी तेऽद्रुतेति। ते तव दृशोर्द्वयी विधिना वञ्चिताऽस्ति। ²यत् तव मुखस्य लक्ष्मीं न ³वीक्षते। स्वमुखं कोऽपि न पश्यति। ⁴तत् तस्मात्कारणात् इमां ⁵त्वन्मुखलक्ष्मीं ⁶स्वयंवरे नलस्य आनने विलोक्य जन्मनः साफल्यम् उपैतु। नलाननं त्वन्मुखसदृशमेव ⁷॥६७॥~~

---

4¹/₂ किंभूतस्य ⁴। 5 ¹/₂ सद्यःपरुदित्यादिना निपातः। 6 ¹/₁ एवद्य —॥६५॥
1 ¹/₁ तदिति। ¹/₂ तदद्येति। 2 B भवन्ती; ¹/₂ भवेन 3 B¹/₂ हंसेन obr.
विलिख्य 4 ¹/₂ इत्यादि —॥६६॥

सर्ग ९ 36

दृशोर्द्वयी ते [1] इति। ते तव दृशोर्द्वयी विधिना वञ्चिताऽस्ति। यत् [2] तव मुखस्य लक्ष्मीं न [3] वीक्षते। चक्षुषा स्वमुखं कोऽपि न पश्यति। तत् [4] तस्मात्कारणात् असावपि दृशोर्द्वयी एव: आगामिनि दिने इमां त्वन्मुखलक्ष्मीं [5] स्वयंवरे [6] नलस्य आनने विलोक्य जन्मन: साफल्यम् उपैतु। नलाननं त्वन्मुखसदृशमेव [7] ॥६७॥

ममैव पाणौ करणेऽग्निसाक्षिकं प्रसङ्गसम्पादितमङ्ग ! सङ्गतम् ।
न हा सहाधीतिधृत: स्पृहा कथं तवाऽऽर्यपुत्रीयमजर्यमर्जितुम् ॥६८॥

ममैव [1] पाणाविति। तव ममैव पाणौकरणे विवाहे अङ्ग ! अहो नलेन सङ्गतं मैत्रीप्रसङ्गेन सम्पादितं [2] दैवात् [3] जातम्। किंभूतम्? अग्निसाक्षिकम्। मैत्र्यपि वह्निप्रत्यक्षा समीचीना भवति। हा इति खेदे। तव आर्यपुत्रस्य नलस्य सख्यम् [4] अजर्यं सौहार्दम् अर्जितुं कथं न स्पृहा? किंभूतस्य तव? सहाधीतिं साहृश्यं [धृत:] [5] धरत: [6]। अथ वा अर्द्धद्वयेन [8] च कमेव वाच्यम्। तदा सङ्गतमजर्येण [7] विशिष्यते। [सङ्गतशब्देन युक्तार्थेनाजर्यं वा] [9] ॥६८॥

दिशीश्वरार्थं न कथञ्चन त्वया कदर्थनीयाऽस्मि कृतोऽयमञ्जलि: ।
प्रसीदतां [1] नाऽधि निगाधमीदृशं दृशौ [2] दधे बाष्परयास्पदे भृशम् ॥६९॥

1 P. दृश इति; P2 दृशोरिति। 2 P. यदि 3 B वीक्षते न 4 BP2 तत्...कारणात् om. दिने 5 P. ०मुखस्य; P2 ०मुखी 6 P. om. स्वयंवरे 7 P. add. हेतुरतिशयोक्तिश्च ॥६७॥
1 P. ममेति; P2 ममैवेति 2 B सम्पादिता 3 P. दैव० 4 B सख्यं 5 P. धरत: 6 P.P2 om. धरत: 7 P. add. अजीर्यदर्थ्येन 8 P2 सङ्गति० 9 P. add. अनुप्रास: ॥६८॥
1 P2 text प्रसीद तन्वा० 2 P2 text दधे दृशौ ——

दिशीश्वरार्थमिति[3]। त्वया अहं दिशीश्वरार्थम् कथञ्चन ।ण।
न कदर्थनीया ।मया अयम् अञ्जलि: कृत:[4] बद्ध:[5]। त्वया प्रसद्यतां प्रस-
न्नेन भूयताम् ।अर्थं[6] ईदृशं न निगाद्यं न वाच्यम् ।अहं बाष्परयस्य
आस्पदे स्थानकीभूते द्वेऽपि दृशौ दधे।ममाश्रुधोरणिसरणी प्रसरत:[7] ॥६९॥

वृणे दिशीशानिति का कथा तथा त्वयीति नेक्षे नलभामपीहया ।
सतीव्रतेऽग्नौ तृणयामि जीवितं स्मरस्तु किं वस्तु तदस्तु भस्म य: ॥७०॥

वृणे[1] दिशीशानिति[2]।अहं दिशीशान् वृणे वरयामि इति का
कथा का वार्त्ता?। तथा ईहया [ईहया] दिशीशदूतोऽयमितीच्छया त्वयि वर्त-
मानां नलस्य भां शोभामपि न ईक्षे ।अथवा या अहम् [इह] त्वयि[3]
तिष्ठन्तीं नलभां न विलोके सा कथं तां [न] वृणे?। उत्तरवाक्यगतो ।यत्
यच्छब्द: पूर्वत्र तच्छब्दं नापेक्षते। किन्तु सतीव्रतमेवाऽग्निस्तत्र जीवितं
[तृणयामि] तृणं करोमि। न तु इत्थं कृते कामस्त्वां पीडयिष्यतीत्या-
शङ्कयाऽऽह-तु पुन: स्मर: किं वस्तु अस्तु ।न [कोऽपि पदार्थ:।यस्तत्[4]
प्रसिद्धं भस्म ।अथवा[5] तदिति पूर्ववाक्यगतमेव वस्तुनो विशेषणम्।
[तथा च न सङ्कीर्णता]। तस्मात्तस्य बाधा[7] मम न शङ्क्या[8] ॥७०॥

न्यवेशि रत्नत्रितये जिनेन य: स धर्मचिन्तामणिरुज्झितो यया ।
कपालिकोपानलभस्मन: कृते तदेव भस्म स्वकुले स्तृतं तया ॥७१॥

3 P. दिशीति। 4 P2 om. विसर्ग:; 5 P2 om. विसर्ग:; 6 B अथ 7 P. add. अनुपसर्ग-
त्वाभावाद् यद्भावे व्यत ।अनुप्रासो दैन्यभावोदय: ॥६९॥
1 P. वृणे दिशीति। 2 P. नरानामिति। 3 P. add. विषये 4 P. यत प्रसिद्धं
5 P2 om. वा तदिति पूर्व° 6 P2 न 7 P. मम बाधा 8 B आशङ्का; P2 ना° ॥७०॥

न्यवेशि[1] रत्नेति। यो धर्मः जिनेन जिनधर्मप्रणेता ज्ञान-
दर्शनचारित्र्याख्ये रत्नत्रितये न्यवेशि[2] रत्नत्रयमध्ये गणितः। यया
स्त्रिया स धर्म एव चिन्तामणिः उज्झितः त्यक्तः। किमर्थम्? कापालिनः
श्रीमहादेवस्य [यः] कोपानलः तस्य भस्म कामः तस्य कृते। स्मरपीडा-
वशात् पतिव्रतात्वं त्यक्तं यया तया स्त्रिया तदेव भस्म स्वस्मिन्
कुले[3] स्तृतं विस्तारितम्। [4]अथवा जिनशब्देन विष्णुरुच्यते[5]। एके
रत्न[त्रयं] पदं वाक्यं प्रमाणं चेति[6] वदन्ति। यथा – पदे वाक्ये प्रमाणे
च यस्य न स्खलिता गतिः। स एव मण्डनो याति लोकत्रितयमण्डनः
( ) ॥ इति त्रिकाण्डीमीमांसायां ग्रन्थकारस्य पथि सञ्चरतः
पुरतः पटहध्वनिः। अन्ये तु धर्मशास्त्रं मन्वादि, अर्थशास्त्रं चाणक्यादि[7],
कामशास्त्रं भरत[8]वात्स्यायनादि[9] रत्नत्रितयम् आहुः। इत्थं[10] जिनेनाऽपि
धर्मो रत्नत्रितये[11] स्वसमये सम्प्रतिपन्नः ॥७१॥

---

निपीय पीयूषरसौरसीरसौ गिरः स्वकन्दर्पहुताशनाहुतेः।
कृतान्तदूतं न तया यथोदितं कृतान्तमेव स्वममन्यताऽदयम् ॥७२॥ ।य

---

निपीय पीयूषेति[1]। असौ नलः तस्याः पीयूषरसस्य
औरसीः सुधार[स]पुत्रीः धृता तस्माज्जाता गिरो वाणीर्निपीय यथा
येन प्रकारेण[2] तया दमयन्त्या उदितं प्रोक्तं [स्वम्] आत्मानं कृतान्तस्य
यमस्य दूतं न अमन्यत। किन्तु [स्वं] कृतान्तमेव साक्षादन्तकमेव
अदयं दयारहितम् अमन्यत। किं विशिष्टायास्तस्याः? स्वस्याऽऽ-
त्मनो नलरूपस्य कन्दर्पहुताशनस्य आहुते[ः] दीपिकायाः[3] ॥७२॥

---

1 P. न्यवे।; P2 न्यवेशीति। 2 B त्रि 3 P. add. अन्वये 4 B अथवा ... उच्यते at the end. 5 P. add. इति 6 B चेति 7 P2 ०क्यादिः 8 B भारत० 9 P2 ०यनादिः 10 P. एवं 11 B ०त्रितये ॥७१॥
1 P. P2 निपीयेति। 2 P. add. विभिन्दता दुष्कृतिनीमि (नै० IX.62) त्यादिना 3 P. add. द्वितीयान्तपाठे तु गीर्विशेषणम्। अनुप्रासो रूपकमतिशयोक्तिश्च ॥७२॥

सर्ग ९ 39

स भिन्नमर्माऽपि तदर्तिकाकुभिः स्वदूतधर्मान्न विरन्तुमैहत।
शनैरशंसन्निभृतं विनिःश्वसन् विचित्रवाक्चित्रशिखण्डिनन्दनः॥७३॥

स[1] भिन्नवर्मेति। स नलः तस्याः आर्तियुक्तैः[2] काकुभिः दीनवचनैर्भिन्नमर्माऽपि स्वस्मात् दूतधर्मात् विरन्तुं न ऐहत। दूतधर्मं त्यक्त्वा स्वयंवरीतुं[3] नेच्छत्।[4] ततः शनैः[5] [शनैः] अशंसत् उवाच। परं निभृतं गुप्तं कामपीडया विशेषेण निःश्वसन्। किं विशिष्टः?। विचित्रायां[6] वाचि वचनविषये[7] चित्रशिखण्डिनन्दनो बृहस्पतिः[8] ॥७३॥

दिवो धवस्त्वां यदि कल्पशाखिनं कदापि याचेत निजाङ्गणालयम्।
कथं भवेरस्य न जीवितेश्वरा न मोघयाच्ञः स हि भीरु! भूरुहः॥७४॥

दिवो[1] धव इति। हे दमयन्ति! यदि त्वां[2] दिवो धवो भर्त्ता इन्द्रः कदापि कल्पशाखिनं याचेत। द्विकर्मकः। किं भूतम्[3]?। निजाङ्गणे आलयो यस्य तं तथा। सदा तत्रस्थम्[4]। ततः कथं त्वम् अस्य नलस्य[5] जीवितेश्वरा भार्या न भवेः[6]। अपि तु भवसि। हे भीरु! हि यतः स भूरुहः कल्पवृक्षः [न] मोघा याच्ञा प्रार्थना यस्य स तथा नास्त्येव। किन्तु प्रार्थितप्रदः॥७४॥

शिखी विधाय त्वदवाप्तिकामनो स्वयं हुतस्वांशहविः स्वमूर्तिषु।
कतुं विधत्ते यदि सार्वकामिकं कथं स मिथ्याऽस्तु विधिस्तु वैदिकः॥७५॥

1 P. सन्निभ इति। 2 B आर्ति॰ 3 P. om. स्वयं 4 P. add. न च तूष्णीं बभूव 5 B om. शनैः शनैः 6 P. विशिष्टायां 7 P. add. विचित्रवाग्भिर्वा 8 P. add. अनुप्रासो विभावना विशेषोक्तिर्वा ॥७३॥

1 P. दिवो। 2 B त्वं 3 B किं भूते?। 4 B एस्यः 5 P. B om. नलस्य 6 B भवति —॥७४॥

सर्ग ९ 40

[1] शिखी विधायेति। शिखी वह्निः यदि तव अवाप्तिमेव कामनां विधाय सार्वकामिकं सर्वकामप्रापकं क्रतुं[2] विधत्ते। किं भूतः? स्वयम् आत्मना स्वासु मूर्तिषु आहवनीयादिषु हुतः स्वांशः[3] स्वभागलक्षणं हविर्येन स तथा। अग्निरपि देवानां मध्ये स्थितो भागं मुख्यं[4] लभते। स्व(133b)यमेव होता [5]मानुषात् होतुः पूर्वोऽन्ये होतृषदने उपविश्य मानुषेण होत्रा स्वरवर्ण[6]हीनत्वादिना विनाशितं मन्त्रावर्णादिकं संधत्ते। [7]यथाविध्यपराधो न भवति। तथा च मन्त्रः – यत्पाकत्रा मनसा दीनदक्षा न यज्ञस्य मन्वते[8] मर्त्यासः। [अग्निष्टद्धोता क्रतुविद्विजानन् यजिष्ठो देवाँ ऋतुशो यजाति[9] ॥ (RV. 8.11.5)] यत् मर्त्यासः] मरणधर्माणो मानुषा होतारः यज्ञस्य पाकत्रा यज्ञस्य परिपाकं स्वरवर्णादियाथात्म्यं मनसा न मन्वते[10] न जानन्ति। तत[11] सर्वम् अज्ञातम् [अग्निर्देवो होता] [क्रतु-वित् सन् विजानन् विशेषेण ज्ञानवान् यजिष्ठो यजनशीलः ऋतुशः काले काले देवान् यजाति[12] ज्ञानपूर्वकं यजति। लेट्। विभक्तिश्छन्दसि, लेटोऽडाटौ (पा० III.iv.94) इति आट् आगमः]॥ ।शो

[13]स्वीय एव हविर्भागः स्वयमेव हविषि[14] आधारः च। ततः स वैदिको विधिः[15] तु पुनः कथं मिथ्याऽस्तु। स्वांशः[16] प्राप्नोत्येवेत्यर्थः। [कथं नु इति पाठान्तरम्] अथवा [स्व[17]] एकोऽंशः एकदेशोऽग्निः[18] हविः-स्वरूपो भवति[19]। [20][21]अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते[22]। आदित्या–

1. शिखी विधायेत्यादि। 2 B कर्तुं 3 P2 स्वांसः 4 BP2 लभते मुख्यं 5 B मानुषात्.... न भवति here. 6 P1P2 वर्णस्वर॰ 7 B तथा॰ 8 B मन्यते 9 P2 यजति 10 B मन्यन्ते; P1P2 मन्वन्ते 11 B P2 तत 12 P2 यजादि 13 P2 तथा च शातपथी.... त्वां प्राप्नोति here. 14 B हवि 15 P2 विधि 16 BP2 त्वांसः 17 P2 om. स्व 18 BP1 ऽग्ने: 19 BP2 सर्वेष्वपि.... न भवति here. 20 BP2 अत्र च.... तदंश एव here. 21 P1 प्रस्ता॰ 22 P1 ॰तिष्ठति

ज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥ (मनु° III·76) इति स्मरणात्। पशु-
व्रीहियवादिकं[23] हविरग्नेरंशः। अत्र च स्वयमेवाऽग्निर्होता[24] तथा हव्य-
मपि। अग्नेरुत्पन्नत्वात्तदंश एव। [[25]अथवा स्वोंऽशः प्रयाजानुयाजघृत-
पुरुषादिवा रूपो देवैर्दत्तः। तथा[26] शातपथी श्रुतिः आख्यायिकया एत[27]-
मर्थमाह – पूर्वं यागेषु देवेभ्यो हविर्वहन् अतिश्रमान्नष्ट्वा[28] अपां मध्ये
वह्निः प्रविष्टः। ततश्च देवैर्विलोड्यमानो[29] यमेन वरुणेन च कथञ्चित्
तत्र स्थितो ज्ञात्वा देवेभ्यो निवेदितः। पुनश्च[30] देवैरनुनीयमानो हव्य-
वहनं वरदानेन अङ्गीकारितः। प्रयाजा अनुयाजाश्च नाम ये याग-
विशेषा[:] ते तवैव भागाः एकस्यैव भवन्तु, नान्यस्य। तथा च
मन्त्राः एतस्मिन्नर्थे ऋग्वेदे सन्ति ॥]

चतुःषष्ठ्यां सप्तपञ्चाशत्तमेऽध्याये देवानाम्
अग्नेश्च संवादे नवर्चं सूक्तं, सप्तगुः ऋषिः, त्रिष्टुप् छन्दः।

महत्तदुल्बं स्थविरं तदासीद्येनावेष्टितः प्रविवेशिथापः।
विश्वा अपश्यद्बहुधा तेऽग्ने जातवेदस्तन्वो देव एकः ॥ X·51·1 ॥

हे अग्ने! तत् महत् उल्बं गर्भवेष्टनं तव स्थविरं
दृढम्[31] आसीत्। येनाऽऽवेष्टितः[32] सन् त्वम् अपः प्रविवेशिथ। हे जात-
वेदः! अग्ने[33]! तव विश्वाः तन्वः शरीराणि बहुधा नानारूपाणि घोराणि
शान्तानि पवमानपावकशुचीनि [34]गुणविशिष्टानि शरीराणि एको

23 P2 °व्रीहियवा° 24 P1 om. तथा 25 P2 om. अथवा .... °दत्तः 26 P2 add. च 27 P2 °मर्थमर्थ° 28 P2 °श्रमानष्ट्वा 29 P2 °मान 30 P2 स्व 31 P2 दृढम् 32 P2 वेष्टितः 33 P2 om. अग्ने 34 P2 om. गुणविशिष्टानि ——

सर्ग ९ 42

देवोऽपश्यत्। पयःप्रविष्टं त्वाम् अजानात्॥ इति श्रुत्वाऽथ अग्नेर्वाक्यम्।

को मा ददर्श कतमः स देवो यो मे[35] तन्वो बहुधा पर्यपश्यत्।
क्वाह मित्रावरुणा! क्षियन्त्यग्नेर्विश्वाः समिधो देवयानीः ॥२॥

हे मित्रावरुणौ! मां को देवो ददर्श॥ तथा स कतमो देवो यो मे तन्वो गात्राणि पर्यपश्यत्। मम अग्नेः विश्वाः[36] देवयानीः समिधः देवान् प्रति गमनशीलाः समिद्धाः तन्वः क्वाह[37] इति प्रश्ने। क्षियन्ति निवसन्ति॥ इत्यग्निनोक्ते देवैरुक्तम्।

[38] ऐच्छाम त्वा बहुधा जातवेदः प्रविष्टमग्ने अप्स्वोषधीषु।
[39] तं त्वा यमो अचिकेच्चित्रभानो दशान्तरुष्यादतिरोचमानम् ॥३॥

अग्ने! [हे] जातवेदः! ~~[illegible]~~ [वयं] त्वा त्वाम् अप्सु ओषधीषु प्रविष्टं बहुधा ऐच्छाम अन्वेषितवन्तः। तं त्वा यमो देवः अचिकेत् जज्ञौ। हे चित्रभानो! दीप्तकिरण!! किं भूतं त्वाम्? दश- सङ्ख्यात् अन्तरुष्यात्[40] अन्तरवासात् अतिक्रम्य रोचमानम्। यावता मार्गेण दश आन्तरवासा भवन्ति तावन्तं बहुयोजनं मार्गमतिक्रम्य देदीप्यमानम्॥

होत्रादहं वरुण[41]! बिभ्यदायं नेदेव[42] मा युनजन्नत्र देवाः।
तस्य मे तन्वो बहुधा निविष्टा एतमर्थं न चिकेताहमग्निः ॥४॥

35 R यो मे twice. 36 R विश्व 37 R ह इति प्रश्नो क्व? 38 R ऐच्छाम 39 R तत्त्वा 40 R आन्त॰ 41 R वरुण twice 42 R नेदेव ~~43 R [illegible]~~

हे वरुण! अहं होत्रात् होतृकर्मणो हव्यवहनलक्षणात् अयम्[43] आगच्छं[44] नष्टः। अत्र कर्मणि देवा मा मां नेत्[45] एव युनजन् मा मां नियोजुः (नियोक्षुः)। प्रविष्टा तस्य मे तन्वः बहुधा निविष्टाः। अहम् अग्निः एतं हविर्वहनम् अर्थं न चिकेत न जाने। नेत्शब्दो[46] भय-वाचको माशब्दस्यार्थे। यदाह यास्काचार्यः[47] - अथापि नेत्येष इत्येतेन युज्यते परिभये[48]। यथा हविर्भिरेके स्वरितः सचन्ते सुन्वन्त एके सवनेषु[49] सोमान्। शचीर्मदन्त[50] उत दक्षिणाभिर्नेज्जिह्मायन्त्यो नरकं पताम इति (निरुक्त० १.३)। किल नारदेन विप्रलभ्यमानानाम् असुरस्त्रीणां वचनम्। एके इतः पृथिव्या हविर्भिः स्वः सचन्ते। एके सवनेषु [सोमान्] सुन्वन्तः। केचन दक्षिणाभिः कर्मसु देवान् मादयन्तः। वयं तु वञ्चसा पापं कुर्वन्त्यो नेत् नरकं पताम। भर्तृशुश्रूषैव स्त्रीणां[51] धर्मः। नरकं न्यरकं नीचैर्गमनम्[52]॥ [अत्र युनजन् मा मां नियोक्षुः। तस्य मे तन्वः बहुधा निविष्टाः। अहमग्निः एतं हविर्वहनम् अर्थं[53] न चिकेत न जाने॥]

---

एहि मनुर्देवयुर्यज्ञकामोऽरंकृत्या तमसि क्षेष्यग्ने[54]।
सुगान् पथः कृणुहि देवयानान् वह हव्यानि सुमनस्यमानः॥५॥

---

हे अग्ने! एहि आगच्छ। किंभूतः? मनुर्देवयुर्यज्ञकाम[55] इत्यग्निविशेषणानि। मनुवंशप्रसूतत्वान्मनुः। तथा - चन्द्रमच्छष-त्वमा अग्निरवाक्षुभश्वाक्षुर्मानवो मनुरासव (?) इति ऋच्या। अथवा

---

43 R2 अयं 44 R1 आगच्छत् 45 R2 om. नेत... न जाने। 46 R2 R2 ०शब्द भय० 47 R2 ०चार्याः 48 R2 परिचये 49 R2 भुवनेषु 50 R2 सुन्वन्तः केचन 51 R2 add. हि 52 R2 नैचै० 53 R2 अन चिकेतने। 54 R1, R2 ०ष्यग्नेः 55 R2 ०कामो

सर्ग ८ 44

मनुः यस्कामो[56] वर्त्तते। देवयुः देवगमनकांक्षी। त्वम् आत्मानं नमसि
गूढस्थानम् [अरम्] अतिशयेन कृत्वा[57] ओषि निवससि। क्षि धातु[58]र्निवासे।
देवयानाम् पथो मार्गान् सुगान् कृणुहि। त्वं सुमनस्यमानो हृष्टः सन्
हव्यानि वह॥

---

अग्नेः पूर्वे भ्रातरो अर्थमेतं रथीवाऽध्वानमन्वावरीवुः।
तस्माद्भिया वरुण! दूरमायं गौरो न क्षेप्नोरविजे ज्यायाः॥ ६॥

---

[हे देवा! मम अग्नेः] सौचीकस्य पूर्वे भ्रातरो
ज्येष्ठा वैश्वानरगृहपतियविष्ठपावकाख्या एतं[59] हविर्वहनम् अर्थम्
अन्वावरीवुः। अनुक्रमेण निषिद्धवन्तः। पूर्वे[60] प्रार्थ्यमानाः सन्तः इति।
शतपथे, यतस्ते अविर्वहन्तः सन्तो वषट्कारेण वज्रेण वृक्णा-
च्छिन्नाः[61] दग्धा[62]स्ततो नाङ्गीकुर्वन्तः (———) इति। ऋग्वेदानु-
क्रमण्याम्, तथा च वषट्कारेण वृक्णेषु भ्रातृषु सौचीको[63]ऽग्नि-
रपः प्रविश्य देवैः समवदुत्तरैस्त्रिभिर्महित्वन्नवं तत्र युजोऽग्निवाक्यं
विश्व इत्युत्तरं वषट्कमयुजो देवानां यामिच्छामेत्युत्तरं चैक-
दशकमिति (X.150)। वृद्धाचार्योऽप्याह बृहद्देवतायाम्,

वैश्वानरे गृहपतौ यविष्ठे अग्नौ च पावके।
वषट्कारेण वृक्णे[64] अग्नौ च सहसः[65] सुतौ॥ VII.62॥
अपच्चक्राम[66] [देवेभ्यः] सौचीको[67]ऽग्निरिति श्रुतिः॥ VII.63॥
स[68] प्राविशदपक्रम्य ऋतूनपो[69] वनस्पतीन्।

---

56 R2 [यास]कामे 57 P1 कृत्वा 58 om. क्षि (1500) निवासगत्योः 59 P1 एनं 60 P1 पूर्वं 61 P1 वृक्णाच्छिन्नाः 62 P1 दग्धा० 63 P1 सोचीं० 64 P1 वृक्णेषु; R2 वृक्णेषु 65 P1 सहसः 66 P1 अपाक्रामत; R2 आपाक्रामत 67 P1 सोचीकोभयादग्निभयाद० 68 R2 om. स 69 P1 R2 ऋतूनापो ——

ततोऽसुराः प्राद्रवन्त सन्नष्टेऽग्नौ हव्यवाहने ॥64॥
तेऽग्निमेवान्वविच्छन्त देवा हत्वाऽसुरान् युधि।
तन्तु [70]दूरे धिमत्स्यैव वरुणश्चान्वपश्यताम् ॥65॥
[71]उभावैनं समादाय देवानेवाऽभिजग्मतुः [72]।
दृष्ट्वा देवास्त्वेनमूचुरग्ने हव्यानि नो वह ॥66॥
[73]वरान् गृहाण वाऽस्मत्तश्चित्रभानो भजस्व नः [74]।
प्रत्युवाच [75] तदाग्निस्तान् विब्रवे ब्रूत यथानु माम् ॥67॥
तत्करिष्ये जुषन्तां [76] तु होत्रं पञ्चजना मम।
शालामुख्यः प्रणीतश्च पुरो गृहपतेश्च यः ॥68॥
उत्तरो दक्षिणश्चाग्निरेते पञ्च जनाः स्मृताः।
मनुष्याः पितरो देवा असुरा [77] राक्षसास्तथा ॥69॥
[78]यास्को यमश्च तानेतानाहतुः पञ्च वै जनान्।
निषादपञ्चमान् वर्णान् मन्यते शाकटायनः [79] ॥70॥
ऋत्विजो यजमानं च शाकपूणिस्तु मन्यते।
आयुरस्तु च मे दीर्घं हवींषि विविधानि च ॥71॥
अरिष्टिः पूर्वजानां च भ्रातॄणामध्वरेऽध्वरे।
प्रयाजाश्चानुयाजाश्च घृतं [80] सोमं च यः पशुः ॥72॥
मद्देवत्यानि [81] वै सन्तु यज्ञो मद्दैवतोऽस्तु च ॥73 ab॥
तस्य त्रीणि सहस्राणि तथा [82] त्रीणि शतानि च।
[83]त्रिंशतिश्चैव देवानां सर्वानेतान् [84] वरान् ददुः ॥74॥

---

70 B2 दुराज्यस० 71 others उभावैनं; B1 चैनं 72 B2 ०जग्मुः 73 others वरं 74 others मत्तश्च 75 others ०वाचाऽथ तानग्निर्विब्रवे देवा यदात्थ माम्॥ 76 B1 जुषतां 77 others गन्धर्वोरगराक्षसाः 78 others यास्कोपमन्यवा— वैता० 79 B2 ०यनाः 80 others ...यः 81 B1 मद्दैवत्या तु 82 others नव 83 others त्रिंशच्चैव तु 84 others सर्वमेव——

तलेऽग्नि: सुमना: प्रीतो विश्वै देवै: पुरस्कृत: ।
विधूयाऽऽनि यत्नेषु चक्रे ऽऽमतन्द्रित: ॥ 75 ॥
भ्रातृभि: सहित: प्रीतो दिव्यात्मा उव्यवाहन: ॥ 76 ॥
रोमाणि[85] काशा:[86] केशास्तु[87] कुशाश्चर्म[88] नखास्थिषा ॥ 77 ॥
अन्त्राणि चैव वाष्पं च मज्जा सिकत[90]शर्करा: ।
असृक् पित्तं च विविधा[91] धातवो गैरिकादय: ॥ 78 ॥
एवमग्निश्च देवाश्च सूक्तैर्महादिति त्रिभि: ।
समूदिरे परे तस्मा[92]दैन्द्रे सूक्ते तु तां सुते ॥ 79 ॥

इति ॥ यथा रथी महाशकटम् अध्वानम् आवृणोति रुणद्धि । तस्मात्
कारणात्[93] भिया हे वरुणाऽहं दूरं नष्टवा आयम् आगत: । यतोऽहमपि
अविजे बिभेमि[94] । तत्राह्द रूपार्थे । यथा गौरो हरिण: क्षेप्नो: ज्याया[95]
धनुषो मौर्व्या बिभेति ॥

---

कुर्मस्त[96] आयुरजरं यदग्ने यथा युक्तो जातवेदो न रिष्या: ।
अथा वहासि सुमनस्यमानो भागं देवेभ्यो हविष: सुजात![97] ॥ 7 ॥

---

हे ~~अ~~ अग्ने! वयं[98] ते तव यत् आयुस्तत् अजरम्
अविनश्वरं वरदानेन कुर्म: । यथा त्वं हविषि युक्त: सन् रिष्या: न[99]
पीडयसे । रिष[100] (1.311) हिंसायाम् । अथ पश्चात्[101] सुमनस्यमान: सन् हविषो
भागं देवेभ्यो वहासि [वहसि हे सुजात!] ॥

---

85 I. काशा: 86 व्यं. केशाश्च; I. केशास्तु 87 व्यं. कूर्मा 88 व्यं. नखानि
च 89 व्यं. शैवलास्त्वेव; I. चैवाऽश्च वका 90 I2 शित° 91 व्यं. विविधं
92 I, तम° 93 I. होत्रात् 94 I. बिभेति 95 I2 द्वयो° 96 I2 कुर्मस्ते
97 I2 सुजात: 98 I2 वह° 99 I. निपी° 100 I. रिष् 101 I2 वर्द्ध. त्वं —

सर्ग ९

[102] प्रयाजान् मे अनुयाजांश्च केवलान् ऊर्जस्वन्तं हविषो दत्त भागम् ।
घृतं [103] चापां पुरुषं चौषधीनामग्नेश्च दीर्घमायुरस्तु देवाः[104] ॥८॥

हे देवाः! मम प्रयाजान् यागविशेषान् अनुयाजांश्च केवलान् ऊर्जस्वन्तं हविषो ~~मम~~ दत्त[105] [तथा] अन्यस्यापि हविषो[106] ऊर्जस्वन्तं बलवन्तं[107] भागं मम[108] दत्त। तथा अपां द्रवद्रव्याणाम् ओषधीनां पुरुषं सारं घृतं च मम दत्त [मे] ममाऽग्नेश्च दीर्घमायुरस्तु॥

तव प्रयाजा अनुयाजाश्च केवल ऊर्जस्वन्तो हविषः सन्तु भागाः[109] ।
तवाऽग्ने यज्ञोऽयमस्तु सर्वस्तुभ्यं नमन्तां प्रदिशश्चतस्रः ॥९॥

हे अग्ने! तव केवले असाधारणा एव प्रयाजा अनुयाजाश्च तथा हविषः ऊर्जस्वन्तो भागाः[110] सन्तु। किं बहुना? हे अग्ने! तव सर्वोऽयं यज्ञोऽस्तु। तथा तुभ्यं चतस्रोऽपि दिशः प्रनमन्ताम्। सर्वं तवैव प्रणं भवतु। त्वं होत्रं कुरु। तदनन्तरं स्विष्टकृल्लक्षणो भागः सर्वहविर्मध्यादग्नेरसाधारण एव॥

इत्थं नवानाम् ऋचाम् अर्थेन देवानामग्नेश्च संवादः[111]।
इत्थं यदा अग्निः स्वयमेव होता भूत्वा स्वयं च स्वं भागं हविः स्वासु[112] मूर्तिषु जुहोति तदा त्वां प्राप्नोति ॥७५॥

सदा तदाशामधितिष्ठतः करं वरं प्रदातुं चलिताद्[1] बलादपि ।
मुनेरगस्त्याद् वृणुते स धर्मराड् यदि त्वदाप्तिं भण का तदा गतिः ॥७६॥

102 B₂ प्रजाया 103 B₂ om. घृतं चापां 104 B देवताः 105 B add. भागम् असाधारणान् दत्त्वा तस्मा 106 B₂ विहिष 107 B₂ चलं॰ 108 B सम 109 B भागः ~~[illegible]~~ 110 B भागः 111 B संवादाः 112 B₂ आसु—॥७५॥ 1 B₂ +ext वलि॰

सदा[2] तदाशामिति। स धर्मराड् यमः अथ च न्यायवान्
यदि तव आप्तिमगस्त्यात् मुनेः सकाशात् वृणुते याचते। किं भूतात्।
बलादपि वरमभिलाषं[3] करं दण्डं प्रदातुं चलितात् [प्रवृत्तात्][4]। यतः
सदा[5] तस्य यमस्याऽऽशां दक्षिणामधितिष्ठतः[6]। परभूमौ किल मुधा न
वस्तव्यम्। कर्मणां[7] क्रिया[यां]ः किमपि भाटकं बलादपि संमुखं भणित्वा
भूमिस्वामिनो दातव्यम्। अथ च यो यस्याऽऽशां[8] बिभर्ति स तस्य
काञ्चिदिच्छां करोति। ततस्त्वदाप्तिं[9] याचते चेत् धर्मराज[ः][10] धर्मेणैव,
ततस्तदा तव का गतिः। त्वं तस्य पत्नी भवस्येव ॥७६॥

---

कतोः कते जाग्रति वेद[1] कः कति पतेरपां[2] वेश्मनि कामधेनवः।
त्वदर्थमेकामपि याचते स चेत् प्रचेतसः पाणिगतैव वर्तसे ॥७७॥

---

क्रतोः[3] क्रते इति। अपां पत्युर्वरुणस्य वेश्मनि क्रतोः क्रते[4]
यागहविरर्थं [कति] कामधेनवो जाग्रति विद्यन्ते? इति को वेद?। न कोऽपि
सङ्ख्यां जानाति। स निरन्तरं यागदीक्षापर एव। यदि स त्वदर्थमेका[5]-
मपि कामधेनुं याचते, ततस्त्वं प्रचेतसः पाणिगता एव वर्त्तसे ॥७७॥

---

न सन्निधात्री यदि विघ्नसिद्धये पतिव्रता पत्युरनिच्छया शची।
स एव राजव्रजवैशसात् कृतः[1] परस्परस्पर्द्धिवरः स्वयंवरः ॥७८॥

---

न सन्निधात्रीति[2]। यदि शची इन्द्राणी विवाहविघ्न—

---

2 B1 B2 सदेति। 3 B °लाषा 4 B2 स्वकृतात् 5 B2 om. दक्षिणाम् 6 B2 वास्तव्यम्
7 B कर्मणां 8 B1 यस्या आशां 9 B °स्तदा° 10 B2 om. विसर्गः ॥७६॥
1 B2 text वेत्ति 2 B2 text प्रभोः° 3 B1 क्रतोरिति। 4 B1 क्रतो 5 B कामपि twice ॥७७॥
1 B2 text कृते 2 B1 न संमिति। 3 B2 om. न सन्निधात्रीति।

सिद्धये पत्युरिन्द्रस्याऽनिच्छया न सन्निधात्री सन्निहिता न भवित्री[3]। यतः पतिव्रता। ततस्तव [स] स्वयंवर एव कुशः[4] भविष्यति? कस्मात्?। राज्ञां व्रजस्य समूहस्य वैरसात् मरणात्। यतः[5] परस्परस्पर्द्धिनो वरा यत्र स तथा। सर्वत्रेन्द्राणीसन्निधानात् विघ्नो[6] न भवति। विवाहे[7] तु [शच्या असन्निधानात्] तु[8] ते परस्परयुद्धात् एव हेतोर्मरिष्यन्ति॥७८॥

निजस्य वृत्तान्तमजानतां मिथो [रोषात्] परुषाणि जल्पतः (मुखस्य)।
मृधं किमच्छत्रकदण्डताण्डवं भुजाभुजि[1] ओणिभुजां दिदृक्षसे॥७९॥

निजस्य[2] वृत्तान्तमिति। त्वं किं ओणिभुजां युद्धं दिदृक्षसे? कथम्? यथा भवति। अच्छत्रका छत्ररहिता ये दण्डास्[3]तेषां ताण्डवं[4] नृत्तं यत्र। छत्रदण्डैर्युध्यमानानां यथा भुजैरेव प्रहृत्य (१३२९) युद्धं वृत्तं भुजाभुजि। केचिद् बाहुयुद्धेन केचिच्च दण्डयुद्धेन [योत्स्यन्ते][5]। किंभूतानाम्?। [मिथो[6] रोषात्] निजस्य[7] परुषाणि[8] जल्पतो मुखस्य वृत्तान्तम् अजानताम्। कोलाहलेन सङ्कुलयुद्धे अहं[9] किमपि वदन्नस्मीति शुद्धिर्नास्ति॥७९॥

अपार्थयन्याजकफूत्कृतिश्रमं ज्वलेद्रुषा चेद्वपुषा तु[1] नाऽनलः।
अलं नलः कर्तुमनग्निसाक्षिकं विधिं विवाहे तव सारसाक्षि! कदा?॥८०॥

अपार्थयन्निति। तु पुनश्चेदनलो वह्निः वपुषा शरीरेण न ज्वलेत् रुषा कोपेन। किं कुर्वन्?। याजकस्योपाध्यायस्य[2]

3 P2 भवति 4 BP1P2 कव; edd. कुतः 5 P2 यतो 6 P2 विघ्ना न भवन्ति 7 BP1 विवाहेषु 8 P2 add. न — ॥७८॥ 1 P2 +ext. अमृतं 2 P1P2 निजस्येति। 3 P1 om. विसर्गः 4 P1 नृत्यं 5 P1 योधयन्ते 6 BP1P2 om. मिथो रोषात्; edd. add. मिथो रोषात् 7 P1 निजस्य alt. जल्पतो 8 P1 पुरु° 9 P1 अलं — ॥७९॥ 1 P2 +ext. वपि
2 P1 यासिक°

सर्ग ९ 50

फूत्कृतिश्रमम् अपार्थयन् वृथा कुर्वन्। स[3] वारंवारं मुखेन फूत्करोति, परं न ज्वलति। ततो हे सारसाक्षि! तव विवाहे नलः अनग्निसाक्षिकं विधिं कर्तुम्[4] [अलं] समर्थः। ज्वालां विना होमो न भवति। होमं विना अग्निः साक्षी न भवति ॥७०॥

पतिंवरायाः कुलजं वरस्य वा यमः कमप्याचरितातिथिं यदि।
कथं न गन्ता विफलीभविष्णुतां स्वयंवरः साध्वि! समृद्धिमानपि॥७१॥

पतिंवराया[1] इति। यदि यमः पतिंवराया दमयन्त्याः कुले जातं गोत्रिणं वा अथवा वरस्य गोत्रजं कमप्यतिथिम्[2] आचरिता[3] स्वगृहं नेष्यति। हे साध्वि! समृद्धिमानपि स्वयंवरः कथं विफलीभविष्णुतां न[4] गन्ता। निष्फलो न भविष्यति[5] ॥७१॥

अपः[1] प्रति स्वामितयाऽपरः सुरः स ता निषेधेद्यदि नैषधक्रुधा।
नलाय लोभातलपाणयेऽपि ते पिता कथं त्वां वद सम्प्रदास्यते?॥७२॥

अपः[2] प्रतीति। अपरः सुरः अपः पानीयानि प्रति स्वामितया वरुणः स यदि ताः अपः नैषधक्रुधा निषेधेत्।[3] [नलसम्प्रदान-समर्थने सर्वं व्याप्यसामर्थ्यं व्यञ्जनेन वदेत्यनेन[5] गर्भितत्वं गुणः।] तत् ततो वद तव पिता त्वां नलाय कथं सम्प्रदास्यते? किंभूताय? लोभेनाऽनलः पाणिर्येन तस्मै तथाविधायाऽपि। उदकं विना सङ्कल्पो न भवति। [अभितः परितः समया निकषा हा प्रतियोगेषु दृश्यते (वा० ३७) इति द्वितीया] ॥७२॥

3 ।. सा M B ।. 4 B नलः — ॥७०॥ 1 ।. पतिमिति । 2 B किम० 3 B अवापिता M ।. गन्ता न 5 ।. add हेतुः ॥७१॥ 1 2 ।. ~~वा~~ अपो 2 ।. अप इति । 3 ।. केन वदेत्यनेन गर्भितत्वं गुणः। [कुमि अपरस्मैस्थि अरेहो (का० प्र० VII, 320) इतिवत् M ।. कथं त्वां नलाय; B त्वां कथं नलाय 5 ।. ०न्दास्यति — ॥७२॥

सर्ग ९ 51

इदं महत्तेऽभिहितं हितं मया विहाय मोहं दमयन्ति! चिन्तय।
सुरेषु विघ्नैकपरेषु को नरः करस्थमप्यर्थमवाप्तुमीश्वरः ॥८३॥

[इदं महत्ते इति। हे दमयन्ति! इदं ते तव मया महत् हितम् अभिहितम्। त्वं मोहं विहाय चिन्तय। सुरेषु विघ्नैकपरेषु सत्सु को नरः करस्थमपि अर्थम् अवाप्तुमीश्वरः?] ॥८३॥

इमा गिरस्तस्य विचिन्त्य चेतसा तथेति सम्प्रत्ययमाससाद सा।
निवारितावग्रहनीरनिर्झरे नभोनभस्यत्वमलम्भयद् दृशौ ॥८४॥ १६

इमा गिर इति। सा दमयन्ती तस्य दूतस्य इमा गिरो विचिन्त्य चेतसा सम्यक् प्रत्ययं प्रतीतिमाससाद आप। कथम्? तथेति। मम नलावाप्तिर्न भविष्यति। ततः स्वदृशौ नभोनभस्यत्वं श्रावणभाद्रपदत्वम् अलम्भयत्। किंभूतेन? [निवारितोऽवग्रहो वृष्टिनिरोधेन नीरनिर्झरो ययोः ते तथा। अथ च कस्याऽप्यवग्रहेण बाष्पनिवारणं न कृतम्। रुरोदेत्यर्थः। [अपारितावग्रहेति पाठे न पारितः पर्याप्तोऽवग्रहो ययोस्तौ। अपारितावग्रहो नीरनिर्झरौ यत्र ते तथा]] ॥८४॥

स्फुरत्पतत्राभ्यामलिदम्पतीव तद्विलोचनाभ्यां कुचकुड्मलाशया।
निपत्य बिन्दू हृदि कज्जलाविलौ मणीव नीलौ तरलौ विरेजतुः ॥८५॥

1 P2 + ex + वचस्ते 2 P2 + ex + महद्धितं 3 P1 इदमिति । M P2 om. अभिहितं त्वं 5 P1 विघ्नैक — ॥८३॥

1 P1 इमेति। 2 P2 om. दूतस्य 3 P1 प्रतीतिं प्रत्ययम् 4 P1 वद्ध इति 5 B अतम् 6 P2 यत्र 7 P2 ययोः — ॥८४॥

सर्ग ९ 52

[1]स्फुरोत्पलाभ्यामिति। तस्या[ः] विलोचनाभ्या[म्]मेव स्फुराभ्यां विकसिताभ्यामुत्पलाभ्यां सकाशात् द्वौ कज्जलेनाविलौ मिश्रौ /श्रौ बाष्पबिन्दू नीलौ [3]तरलौ चञ्चलौ [4]च हृदि निपत्य। नीलौ [मणी इन्द्रनीलमणीव विरेजतुः। विलेसतुः। हारमध्यस्थं नायकरत्नं तरलम्। काविव? अलिनौ दम्पतीव[5]। कया निपत्य? कुचावेव कुड्मलौ] तयोराशया। भ्रमरो हि पुष्पात् पुष्पान्तरं सञ्चरति। मणीवादीनामुपसङ्ख्यानमिवे° ? इति मणीव दम्पतीवेत्यत्र, द्विवचनमनौ (का° ...[2] [इति] सन्धिनिषेधो न भवति। [तदुक्तम् - ईदादिप्रगृह्यत्वे[6] मणीवादीनां प्रतिषेधो वक्तव्यः।। मणीवोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम। दम्पतीव रोदसीव। श्री[7]महाभारते [8]मङ्क्युपाख्याने (शान्ति° XII.171.12 ab) प्रयोगोऽयम्][9] ।। ८२ ।।

धुतापतत्पुष्पशिलीमुखाशुगैः शुचेस्तदासीत् सरसी रसस्य सा।
रयाय बद्धादरयाऽश्रुधारया सनालनीलोत्पलनीललोचना ।।८३।।

[1]धुतापतत्पुष्पेति। सा तदा शुचेः शोक[स्य] रसस्य[2] सरसी [3]आसीत् [4]सशोकाऽभूत्। किंभूता? पतद्भिः पुष्पशिलीमुखस्य कामस्याऽऽशुगैर्बाणैर्धुता[5]। किंभूता? रयाय वेगाय बद्धादरया[6] अश्रूणां धारया कृत्वा सनालं यन्नीलोत्पलं तद्वत् नीले तदनुकारिणी लोचने यस्याः। अश्रुधारा एव नालद्वयम्। अथ शुचेर्ग्रीष्मस्य सरसी पतन्तः[7]

1 P1 स्फुर इति। 2 P2 add. च 3 P2 om. तरलौ 4 P1 om. च 5 P1 add. उत्प्रेक्षा वा 6 P2 इदादि° 7 P1 भारते 8 P1 मन्थङ्कु° 9 P1 add. किञ्चोपमावाचको /र वशब्दोऽप्यस्ति। यथा- तासां मुखानि रतिखेदविपाण्डुराणि कान्तोपभोगशुभदृष्टिमनोहराणि। रत्यन्तरे दशनजर्जरिताधराणि कादम्बखण्डितदलानि व पङ्कजानि।। ( ) इति। अनुप्रास उत्प्रेक्षा रूपकं भ्रान्तिमान् काव्यलिङ्गमुपमा च।।८२।। 1 P1 धुतेति। P2 धुतापतदिति। 2 P1 add. उपचितस्य 3 P1 बभूव
4 B सशोको° 5 P1 धृता 6 P1 °दराय 7 B P2 पतङ्गाः

सर्ग ९ 53

~~पुष्पेभ्यः शिलीमुखा भ्रमरा येभ्यः~~ एवंविधैराशुगैर्वायुभिः धुता तत्र काले उद्दण्डा वायवो वान्ति। सनालनीलोत्पलाश्च शुष्कजलत्वान्नालदण्डाः प्रकरा भवन्ति ॥८६॥

अथोद्भ्रमन्ती रुदती गतश्रमा ससम्भ्रमा लुप्तरतिः स्खलन्मतिः।
व्यधात् प्रियप्राप्तिविघातनिश्चयान्मृदूनि दूना परिदेवितानि॥८७॥ सा

अथोद्भ्रमन्तीति। अ(132b)थ सा प्रियस्य नलस्य प्राप्तेर्विघातस्याऽभावस्य निश्चयात् मृदूनि दूना सती परिदेवितानि रुदितानि व्यधात्। किंभूता? उद्भ्रमन्ती ग्रथिला रुदती गता श्रमा यस्याः। ससम्भ्रमा सभया। लुप्ता रतिः प्रीतिर्यस्याः। स्खलन्ती मतिर्मननं यस्याः॥८७॥

त्वरस्व पञ्चेषुहुताशनात्मनस्तनुष्व मद्भस्मभयं यशश्चयम्।
विधेः परेहाफलभक्षणव्रती पताधि तृप्यन्नसुभिर्ममाफलैः॥८८॥

त्वरस्व पञ्चेति। हे पञ्चेषुहुताशन! हे कामाग्ने! त्वं त्वरस्व। मां दग्ध्वा मम भस्ममयमात्मनो यशसः कीर्तेः चयं समूहं तनुष्व लोके विस्तारय। तथा हे विधे! हे दैव! त्वमपि ममाऽफलैः निष्फलैरसुभिः प्राणैः तृप्यन् सन् पत पतितो भव, मा मारयन्। किंभूतः? परस्याऽन्यस्य ईहाया वाञ्छायाः फलस्य भक्षणमेव व्रतं यस्य तव स तथा। परस्याऽभीष्टं न करोषि। अथ च यस्य फलभक्षणव्रतं [स] अफलानि भक्षयन् व्रतात् च्युतः पतितो भवति॥८८॥

8 P1 ०राशुगै० 9 P2 युत। 10 P2 प्रकाराभूता — ॥८६॥ 1 P1 अथोति। 2 P1 सती 3 P2 भय M B जातिभिर्नं — ॥८७॥ 1 P1 त्वरस्वेति; P2 त्वरस्व पञ्चेति। 2 P2 om. हे 3 P2 om. न 4 P2 फलानि — ॥८८॥

भृशं वियोगानलतप्यमान![1] किं विलीयसे न त्वमयोमयं यदि।
स्मरेषुभिर्भेद्य! न वज्रमप्यसि ब्रवीषि न स्वान्त! कथं न दीर्यसे॥८९॥

भृशं[2] वियोगेति। हे स्वान्त![3] हे मानस! [भृशं] वियोगानलेन तप्यमान![4] त्वं यद्ययोमयं लोहमयं वर्तसे। किं न विलीयसे![5] वह्नितप्तं [लोहं] तद्विलीनं जायते। [क्षुब्धस्वान्तध्वान्तलग्नम्लिष्ट-[7][8] विरिब्धफाण्टबाढानि मन्थमनस्तमःसक्ताविस्पष्टस्वरानायासभृशेषु (पा० VII.ii.18) इडभावः।[9] क्षुभि वाहीत्यादि (IV.VI.13) कात्यायनः][10] किं त्वं[11] न ब्रवीषि॥ त्वं वज्रमपि[12] वज्रमयमपि नाऽसि न[13] भवसि। यतः हे स्मरस्य[ापि] इषुभिर्भेद्य!॥ वज्रं हि केनाऽपि न भिद्यते। ततस्त्वं कथं न[14] दीर्यसे॥ [विदीर्यसे इति पाठान्तरम्। वज्रशब्दः पुंनपुंसकः]॥८९॥

विलम्बसे जीवित! किं द्रव द्रुतं ज्वलत्यदस्ते हृदयं निकेतनम्।
जहासि नाद्यापि मृषा सुखासिकामपूर्वमालस्यमहो तवेदृशम्॥९०॥

विलम्बसे[1] इति। हे जीवित! त्वं किं विलम्बसे!॥ द्रुतं शीघ्रं द्रव गच्छ। ते तव जीवितस्य निकेतनं गृहम् अदः हृदयं ज्वलति।[2] अहो, आश्चर्यम्। तवेदृशमपूर्वमालस्यं यद्गृहे दीप्तेऽपि अद्याऽपि मृषा[3] व्यर्थं[4] सुखासिकां सुखेनाऽऽसनं न जहासि न त्यजसि॥९०॥

1 P2 + ex- तप्य० 2 P1 भृशमिति। 3 BP2 हे मानस! add तप्यमान M P1 तप्य० 5 P1 विसीर्यसे 6 P1 om. तत् 7 P2 क्षुब्धस्वान्तध्वान्तेति [इडभावः] 8 P1 ०म्लिष्ट० 9 P1 इडभावः 10 P1 क्षुभि० 11 P1 त्वं किं न ब्रवीषि किमर्थं; P2 त्वं किं 12 P2 om. वज्रमपि 13 P2 भवसि न 14 P2 विदीर्यसे —॥८९॥
1 P1 विलम्बस इति। 2 B ज्वलसि 3 B तवेदृश० 4 P1 व्यर्थं —॥९०॥

सर्ग ९ 55

दृशौ महापातकिनो मनोरथाः कथं पृथू वामपि विप्रलेभिरे।
प्रियश्रियः प्रेक्षणघाति पातकं स्वमश्रुभिः क्षालयतं शतं समाः ॥९१॥

---

दृशौ महा इति। हे दृशौ। महापातकयुक्ता मम मनोरथाः कथं वामपि युवामपि विप्रलेभिरे विप्रतारितवन्तः। किंभूते युवाम्? पृथू विस्तीर्णे। ततो युवां प्रियस्य नलस्य श्रियः शोभायाः प्रेक्षणघाति दर्शनविघ्नकरं [पातकं] पापं स्वमात्मकृतं शतं समा वर्षाणि यावत् अश्रुभिः कृत्वा क्षालयतम्। नलदर्शनं विना चिरं रोदनमेव युवयोरित्यर्थः। [मृषापातकिन इति पाठे अलक्ष्यार्थसंसर्जन मृषापातकयुक्ता इति व्याख्येयम्] ॥९१॥

---

प्रियं च मृत्युं न लभे तवेप्सितं तदेव न स्यान्मम यत्त्वमिच्छसि।
वियोगमेवेच्छ मनः प्रियेण मे तव प्रसादान्न भवत्वसौ मम ॥९२॥

---

प्रियं च मृत्युमिति। हे मनः अहं तवेप्सितं प्रियं च नलम् अथवा मृत्युं [च] त्वदीप्सितं तावन्न लभे न प्राप्नोमि। यतः [यत्] त्वं मम इच्छसि तदेव न स्यात्। तत्प्रियावाप्तिप्रभृतिकं न भवेदेव इति तावद् दृष्टम्। ततः कारणात् हे चित्त! मम त्वं प्रियेण नलेन सह वियोगमेवेच्छ अभिलष। तव प्रसादात् ममाऽसौ वियोगो न भवतु॥ /योगो ॥९२॥

---

न काकुवाक्यैरतिवाममङ्गजं द्विषत्सु याचे पवनं तु दक्षिणम्।
दिशापि मद्भस्म किरत्वसौ त्वया प्रियो यया वैरविधिर्वधावधिः ॥९३॥/त

---

1 P2 + ed. मृषा 2 P1 दृश इति। 3 P2 महामहा° 4 P2 om. युवामपि 5 P2 करणा° 6 P2 कृता 7 P2 नले — ॥९१॥ 1 P2 + ed. न 2 P1 om. प्रियं च मृत्युमिति। 3 P1 om. च 4 P2 add. च 5 P2 ना° 6 P1 इच्छा अभिलाषः — ॥९२॥

सर्ग ९ 56

न[1] काकुवाक्यैरिति। अहं विपत्सु मध्ये अङ्गजं कामं काकुवाक्यैर्दीनवाक्यैर्न[2] याचे। यतोऽतिशयेन[3] वामं प्रतिकूलं तु पुनः पवनमनिलं याचे। यतः दक्षिणम् अनुकूलम् (अयच्च दक्षिणानिलम्) अङ्गाज्जातः पुत्रोऽपि[4] प्रतिकूलो[5] न प्रार्थ्यते। विपन्नप्यनुकूलः प्रार्थ्यते। असौ दक्षिणानिलो मां हत्वा मम भस्म तया दिशा किन्तु यया दिशा मम प्रियो नलो वर्तते। (1339) यतो वैरविधिर्वधः वैरावधिर्यस्य स तथा। मारणानन्तरं विरहिणामनिलेन सह वैरं शान्तम्। नलः प्रार्पितं[6] स करिष्यति[7]॥९३॥

अमूनि गच्छन्ति युगानि न क्षणः कियत् सहिष्ये न हि मृत्युरस्ति मे।
न मां तु कान्तः स्फुटमन्तरुज्झिता न तं मनस्तच्च न कायवायवः॥९४॥

अमूनि[1] गच्छन्तीति। ममाऽयं क्षणो न गच्छति, किन्त्वमूनि दीर्घाणि युगानि गच्छन्ति। अहमधाऽपि कियत् सहिष्ये। मे मम मृत्युर्नहिर्नास्ति[2]। तु पुनः स्फुटं निश्चितं कान्तो नलो माम् अन्तर्नोज्झिता न त्यक्ष्यति। मनः कर्तृ तं[3] नलं न त्यक्ष्यति[4]। कायस्य / ति वायवः प्राणादयः तच्च मनो न त्यक्ष्यन्ति।
कार्यकारणसङ्घातोपाधिक[5] आत्मा शरीरेषु क्षेत्रमः तमन्तः[6] स्थूलशरीरमध्ये स्थितमहं शब्दवाच्यं नलो नोज्झति। अहं[7] नलं न मुञ्चामि। नलं[8] च मनो न मुञ्चति। नलो मनो न मुञ्चति। स्व ~~नलोऽपि~~

---

1 P. नेति। 2 P. P2 ०वचनै० 3 P. यत 4 P. प्रतिकूलोऽपि पुत्रो 5 P2 om. प्रतिकूलो 6 P. प्रार्थितो 7 B 91 — ॥९३॥

1 P. अमूनीति। 2 P. नहि नास्ति; P2 नहिस्ति 3 P2 कर्तृभूतं नलं 4 P2 त्यक्ष्यति 5 P. सङ्घात औपा०; ०पाधिकं 6 P2 अतः 7 P, P2 om. अहं ... मुञ्चामि। 8 P2 नलः स्व०

[1] सर्ग ९ 57

मनोऽपि कायवायवो न मुञ्चन्ति] पुर्यष्टकाख्यस्य[10] लिङ्गशरीर-
स्योपलक्षणं मनः बुद्धीन्द्रियाणि खलु पञ्च। तथाऽपराणि कर्मे-
न्द्रियाणि, मन आदि-चतुष्टयं च। प्राणा हि पञ्च। अथो वियदा-
दिकं च कामश्च कर्म च तमः पुनरष्टमी भूः [इति] पुर्यष्टकम्।
बुद्धिकर्मेन्द्रियाणि। मनोबुद्ध्यहङ्कारतद्वृत्तयः। प्राणापानसमान[11]व्यानो-
दानाः। पृथिव्यादिपञ्चकम्। कामः। कर्म शुभाशुभम्। तमोऽविद्या।
मनश्च लिङ्गशरीरं यावत् तावत् स्थूलशरीरं न त्यजति। जीवे
उत्क्रामति इन्द्रियाण्युत्क्रामन्ति। लिङ्गे उत्क्रामति स्थूलशरीरं
पाट्कौशिकं विच्छिद्यते। तथा च श्रुतिः —

तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणा—
मनुत्क्रामन्तं[2] सर्वे प्राणा अनूत्क्रामति (बृ० IV.iv.2)

[क्रान्तस्य चान्तःस्थितत्वे ममशब्दवाच्यस्य] लिङ्गशरीरस्योत्क्रमणा-
भावात् सर्वेषामनू[3]त्क्रमणाभावः। ततो [मम] मरणं नास्ति ॥९४॥

---

मदुग्रतापव्ययशान्तशीकरः सुराः! स वः केन पपे कृपार्णवः।
उदेति कोटिर्न मुदे मदुत्तमा किमाशु सङ्कल्पकणक्रमेण वः[1] ॥९५॥

---

मदु[2]ग्रतापेति। हे सुराः! स वो युष्माकं कृपाया
अर्णवः केन पपे[3] क्व गतः? किंभूतः? ममोग्र[स्य] तापस्य व्यये प्रशमने
शान्ताः शीकरा यस्य स तथा। किमाशु वो युष्माकं सङ्कल्पकणस्य क्रमेण
इच्छामात्रेण मत्सकाशादुत्तमा अधिका स्त्रीणां कोटिर्नोदेति नोत्पद्यते[4]।
किमर्थम्? मुदे हर्षाय ॥९५॥

---

1 P2 om. मनो०... मुञ्चन्ति। 10 P1 ०ष्काख्य० ॥ 11 P2 om. ०समान० । 2 P1, P2 ०मन्तं
3 P2 ०मुपक्रमणा० — ॥९४॥

1 P2 read वा 2 P1 om. मदुग्रतापेति। 3 P2 पपौ 4 P1 add. अपि नूत्पद्यते — ॥९५॥

ममैव वाऽहर्दिवमश्रुदुर्दिनैः प्रसह्य वर्षासु ऋतौ प्रसज्जिते।
कथं न[1] शृण्वन्तु सुषुप्य देवता भवत्वरण्ये रुदितं न मे गिरः ॥६६॥

ममैव[2] वा इति। वा अथवा देवता मम[3] वाक्यं कथं न शृण्वन्तु।[4] किं कृत्वा? सुषुप्य अत्यर्थं निद्रां कृत्वा। क्व सति? ममैवाऽश्रूणां दुर्दिनैर्[5] वृष्टिभिरहर्दिवं प्रतिदिनं प्रसह्य वर्षासु ऋतौ वर्षाकाले प्रसज्जिते सति[6] (देवतानामुत्तरायणं दिवसः। दक्षिणायनं रात्रिः[7] वर्षाः।) तस्मान्मम गिरोऽरण्ये रुदितं[8] न भवतु। अपि तु भवतु। [अचतुरविचतुर[9] (पा० V.iv.77) त्यादिनाऽहर्दिवमिति निपातः][10] ॥६६॥

इयं न ते नैषध! दृक्पथातिथिस्त्वदेकतानस्य जनस्य यातना।
हृदे हृदे हा न कियद्गवेषितः स वेधसाऽगोपि खगोऽपि वाक्कि यः ॥६७॥

इयं[1] न ते इति। हे नैषध![2] इयं ते तव त्वयि विषये एकतानस्य एकचित्तस्य जनस्य मल्लक्षणस्य यातना पीडा। याचनेति क्वचित्पाठे[3] याचना प्रार्थना न[4] दृक्पथस्य अतिथिः त्वं न पश्यसि। हा कष्टं मया स खगो हंसः हृदे हृदे कियत् न गवेषितः[5] बहु विचितः।[6] परं वेधसा सोऽपि अगोपि क्वाऽपि गोपितः। यो नैषधस्याग्रे पक्षी ममाऽऽर्तिं वक्ति ॥६७॥

1 R text नु 2 P. om. ममैव इति; R ममैव या (वा) इति। 3 R om. मम 4 P. add. विवक्षितकर्मत्वेऽपि मद्वाक्यमिति प्रतीयते। वा गिर इत्यत्राऽपि सम्बध्यते-त्यन्यः। 5 P. add. लक्षणया 6 P. add. मेघच्छन्नेऽह्नि दुर्दिनम् (अमर० I.iii.12)। अहोरात्रोपलक्षणमहःशब्दोऽत्र। अह्नि मेघे ... मेघाच्छादनमिति व्यधिकरणो वा समासो ... चन्द्रागुरिर्दुर्दिनेऽत्युपधिकारोऽब्दैः। 7 P वर्षाः 8 R om. रुदितं 9 R अचतुरेत्यादिना 10 P. add. प्रसज्जितैरिति प्रसज्जतीति च पाठान्तरम्।

Contd....

ममाऽपि किं नो दयसे दयाधन[1]स्त्वदङ्घ्रिमग्नं यदि वेत्थ मे मनः।
निमज्जयन् सन्तमसे पराशयं विधिस्तु वाच्यः क्व तवागसः कथा?॥ ॥९८॥

[2]ममाऽपीति। हे नल! त्वं दयाधनः सन्[3] ममाऽपि (133 b) किं नो दयसे दयां न कुरुषे। यदि त्वं मे मनः त्वदङ्घ्रिमग्नं तव चरणास्मरणपरं वेत्सि[5]। अथवा अत्रार्थे तु पुनर्विधिर्दैवं[4] वाच्यः सापवादः। तव आगसः[6] कथा क्व[7]? तवापराधवार्त्ता नाऽस्ति। किं कुर्वन् विधिः?। परस्याऽऽशयं चित्तं सन्तमसे निमज्जयन्। त्वदीयं मनो मोहस्थाने क्षोऽयन्। [अधीगर्थदयेशां (पा० II.iii.52) मिति षष्ठी]॥९८॥

कथावशेषं तव सा कृते गतेत्युपैष्यति श्रोत्रपथं कथं न ते?।
दयाणुना मां समनुग्रहीष्यसे तदाऽपि तावद्यदि नाथ! नाऽधुना॥९९॥

[1]कथावशेषमिति। हे नल! सा दमयन्ती तव कृते त्वदर्थे कथावशेषं गता मरणं प्राप्ता इति वार्त्ता कथं तव श्रोत्रपथं नोपैष्यति?। अपि तु [उपैष्यत्येव]। हे नाथ! [2]यद्यधुना तावद् दयां न कुरुषे तदापि मरणश्रवणानन्तरं मां त्वं दयायाः अणुना लेशमात्रेण समनुग्रहीष्यसे॥९९॥

contd. अनुप्रासोऽतिशयोक्तिर्निदर्शना च। रूपकं वा। तदा भपत्वित्येकवचनस्याऽऽनुगुण्यम्॥९६॥

1 P. इयमिति। 2 B P2 हे नैषध omit. न पश्यसि 3 P. add. व्याचष्टेयेते 4 P. om. न 5 P. add. अन्वेषितः 6 B विलोकितः 7 P. यस्तु —॥९७॥

1 P2 r-ker om. विसर्गः 2 P. ममेति। 3 P. add. अविसर्गपाठो वा 4 P. वा 5 P2 आगसः 6 P2 त्यक्ता 7 B अत्रा० 8 P. add. अवसमन्धेभ्यस्तमस (अच्) (पा० V.iv.79) इत्यच्। अनुप्रासो हेतुरतिशयोक्तिश्च॥९८॥

1 P. कथेति। 2 P2 om. तव —॥९९॥

सर्ग ९ 60

ममादरीदं वितरीतुमान्तर नदर्थिकल्पद्रुम! किञ्चिदर्थये।
भिदां हृदि द्वारमवाप्य मैव मे हतासुभिः प्राणसमः समं गमः॥१००॥

ममादरीदम्[1] इति। इदं ममाऽऽन्तरं हृदयं विदरीतुमादरि स्फुरितुं आदरम। तत् हे अर्थिकल्पद्रुम! त्वां किञ्चित् अहम् अर्थये अहं[2] याचे। त्वं मे मम हृदि भिदां विदारणं द्वारम् अवाप्य हतैर्निन्द्यैर्ममाऽऽसुभिः प्राणैः समं चिन्तात् मैव गमः मा निःसर। यतस्त्वं प्राणसमः[3] तत्तुल्यः॥१००॥

इति प्रियाकाकुभिरुन्मिषन्भृशं दिगीशदूत्येन हृदि स्थिरीकृतः।
नृपं स योगेऽपि वियोगमन्मथः क्षणं तमुद्भ्रान्तमजीजनत्पुनः॥१०१॥

इति प्रियेति[1]। स[2] वियोगो विप्रलम्भः शृङ्गारः तेन मिश्रो मन्मथः योगेऽपि दमयन्त्या सह योगेऽपि सन्निधावपि तं नृपं नलं पुनः क्षणमुद्भ्रान्तं ग्रथिलचित्तम् अजीजनत्। शाकपार्थिवादिदर्शनात् मध्यमपदलोपः। किं कुर्वन्? [इति] प्रियायाः काकुवाक्यैर्भृशमुन्मिषन् दीप्यमानः[3]। तथा दिगीशानां दूत्येन हृदि स्थिरीकृतः[4] स्थैर्येण संवृतः[5]॥१०१॥

महेन्द्रदूत्यादि समस्तमात्मनस्ततः स विस्मृत्य मनोरथस्थितैः।
क्रियाः प्रियाया ललितैः करम्बिता विकल्पयन्नित्थमलीकमालपत्॥१०२॥

महेन्द्रदूत्यादीति[1]। [ततः] स नलः इत्थमलीकं

1 P. ममेति। 2 P. om. अहं 3 P. add. प्राणाः जीवितं – ॥१००॥ 1 P. इतीति। 2 P. om. स 3 P. देदीप्य॰ 4 P. P. धैर्येण 5 B संहृतः॥१०१॥ 1 P. महेन्द्रेति।

[मिथ्या] आलपित अज्ञानात् प्रलाप चक्रे। किं कुर्वन्? प्रियायाः ललितैः [विलासैः] करम्बिता मिश्रिताः क्रियाः चेष्टाः विकल्पयन् [विविधाः कल्पयन्]। किं कृत्वा? आत्मनः समस्तं महेन्द्रस्य दूत्यादि दूतत्वादिकं विस्मृत्य। अहं दूतो न भवामि, किन्तु नलोऽहमिति मन्वानः। किं विशिष्टैः? मनोरथेषु पूर्वं स्थितैः मनसि चिन्तितैर्ललितैः ॥१०२॥

---

अपि प्रिये! कस्य कृते विलप्यते विलिप्यते हा मुखमश्रुबिन्दुभिः।
पुरस्त्वयालोकि नमन्नयं न किं तिरस्खलल्लोचनशीलया नलः ॥१०३॥स्व

---

अपि प्रिये इति। हे प्रिये! अपि त्वया कस्य कृते किमर्थं विलप्यते विलापः क्रियते? हा कष्टम् अश्रुबिन्दुभिः मुखं विलिप्यते। त्वया अयं नलः पुरोऽग्रे नमन् सन् अहंलक्षणः किं नालोकि? किंभूतया? तिरस्खलत् कटाक्षपरं लोचनयोः शीलं स्वभावो यस्याः तया तथा। [तिरः पश्यन् हि पुरःस्थितं न पश्यति] ॥१०३॥

---

चकास्ति बिन्दुच्युतकातिचातुरी घनाश्रुबिन्दुच्युतिकैतवात्तव।
मसारताराक्षि! ससारमात्मना तनोषि संसारमसंशयं यतः ॥१०४॥

---

चकास्तीति। हे प्रिये! तव घनानामश्रुबिन्दूनां च्युतेः पतनस्य कैतवात् व्याजात्। बिन्दुच्युतकं नाम काव्यालङ्कार-[ग्र]न्थेषु चित्रविशेषः। तस्याऽति[चातुरी अति]चातुर्यं चकास्ति। तत्त्वं

---

2 P2 अलपत 3 P1 महेन्द्रदू° ॥१०२॥ 1 P2 +ext व्लील° 2 P1 अपि प्रिये 3 B अयि 4 P1 om. किमर्थं 5 P2 विलापं 6 P1 P2 om. अहंलक्षणः 7 B यस्य-
1 P2 +~~ex~~ °च्युति 2 P1 चकास्ति/ 3 B P1 P2 om. अतिचातुरी; edr. add. ॥१०३॥
अतिचातुरी

जानासि। हे मसारे नाम मणिविशेषः [4]तद्वत्सारे उज्ज्वले अक्षिणी यस्यास्तस्याः सम्बोधनम्। [5]त्वं ततः कारणात् [[6]असंशयम्] आत्मना संसारं सह सारेण वर्त्तते तथाविधं तनोषि। संसारशब्दस्य यदा बिन्दुरनुस्वारः च्याव्यते लुप्यते, तदा ससारशब्दो भवति। [7]अथवा ऽश्रु- बिन्दुच्युतिवशात् अभ्यासचातुर्यं जातम्। बिन्दुसं(३४७)युक्तः शब्दो- न्यमर्थं दत्ते। [8]बिन्दुरहितश्चाप्यन्यमर्थं दत्ते। [9]तद्बिन्दुच्युतकं नाम[10]॥१०४॥

अपास्तपाथोरुहि शायितं करे करोषि लीलानलिनं किमाननम्।
तनोषि हारं कियदश्रुणः स्रवैरदोषनिर्वासितभूषणे हृदि ॥१०५॥

[1]अपास्तपाथोरुहीति। त्वं [2]किमाननं स्वमुखं करे शायितं सत् लीलानलिनं करोषि ?। किं भूते हस्ते ?। अपास्तं दुःखेन निराकृतं [3]पाथोरुहं [4]कमलं येन तस्मिन् तथा। गल्लहस्तेन किं चिन्त- यसि। किञ्च [[5]त्वम्] अश्रुणः स्रवैः बिन्दुभिः हृदि कियत् यावत् हारं तनोषि। किंभूते ?। अदोषेण दोषं विनाऽपि[6] निर्वासितानि निरस्तानि भूषणानि येन तत्[7] तथा। यः किल निर्वास्यते स दोषमुद्भाव्य[8] निष्का[9]- स्यते। त्वया[10] तु[11] दुःखेनैव भूषणं त्यक्तम्[12] ॥१०५॥

4 P2 om. तद्वत् 5 P1 om. त्वं 6 B P2 असंशयं यथा भवति 7 P2 अथ च 8 P1 om. बिन्दु... दत्ते 9 P2 ततः 10 P1 add. तदुक्तम् - अन्योऽप्यर्थः स्फुरे यत्र बिन्दोरपनयादपि। बिन्दु _ _ _ _ _ _ स्तद्बिन्दुच्युतकं परम्॥ ( ९ ) यथा - कान्तो नयनानन्दी बालेन्दु ( ९ ) इत्यत्र बाले इति। अनुप्रासोऽपह्नुतिरतिशयोक्तिश्च ॥१०४॥

1 P1 अपास्तेति। 2 P1 किं त्वम् 3 P1 add. अथ च जितं 4 P1 उरुहं 5 B किं भूतम्? 6 P1 add. अथ च अदोषशब्दवाच्यैः स्वभावरमणीयत्वाद् गुणैः 7 P1 तच्च तदा 8 P1 च्युतो 9 P1 P2 काल्यते 10 P1 om. तु 11 P1 दोषेणैव 12 P1 add. लीलानलिनमित्युदारपर्यायोऽतिशयोक्तिर्व्यतिरेकश्लेषावपि ॥१०५॥

सर्ग ९ 63

दृशोरमङ्गल्यमिदं मिलज्जलं करेण तावत्परिमार्जयामि ते।
अथापराधं भवदङ्घ्रिपङ्कजद्वयीरजोभिः सममात्ममौलिना ॥१०६॥

1 दृशोरमङ्गल्यमिति। तावत् अहमिदं 2 ते तव दृशो-
र्मिलदश्रुजलम् 3 अमङ्गल्यरूपं करेण परिमार्जयामि। [अथ पश्चाद्-
हमात्मापराधम् आत्मनो मौलिना कृत्वा भवत्या अङ्घ्रिपङ्कजद्वयी-
4 सम्बन्धिरजोभिः समं मार्जयामि] नमस्कारेण [स्वापराधं चरणा-
रेणुं च स्फोटयामि]॥१०६॥

मम त्वदच्छाङ्घ्रिनखामृतद्युतेः किरीटमाणिक्यमयूखमञ्जरी।
उपासनामस्य करोतु रोहिणी त्यज त्यजाऽकारणरोषणे! रुषम्॥१०७॥

1 [मम त्वदच्छेति। हे प्रिये! मम किरीटस्य
2 मुकुटस्य] माणिक्यानां मयूखा एव मञ्जरी रोहिणी रक्तवर्णा तव 3 अच्छा
4 अङ्घ्रिनखा एवाऽमृतद्युतिस्तस्याऽस्य 5 उपासनां सेवां करोतु नम-
स्कारेण कृत्वा हे अकारणरोषणे! रुषं त्यज त्यज 6। सम्भ्रमे चावद्बोध-
मिट ९ इति द्विर्वचनम्। अथ च रोहिणी चन्द्रस्योपास्तिं कुरुते॥१०७॥

तनोषि मानं मयि चेन्मनागपि त्वयि श्रये तद्बहुमानमानतः।
विनम्य वक्त्रं यदि वर्त्तसे कियन्नमामि ते चण्डि! तदा पदावधि॥१०८॥

1 तनोषि मानमिति। चेत् त्वं मयि विषये मनागपि

1 P. दृशोरमं; 2 दृशोरिति। 2 P. om. इदं 3 P. अमङ्गल्यं 4 P. सम्बन्धिभिः ॥१०६॥
1 P. मम। 2 P. मुकुरमाणि॰ 3 P. अच्छ॰ 4 P. ॰नख 5 P. om. अस्य
6 P. om. त्यज — ॥१०७॥ 1 P. तनोषि। —

सर्ग ९ 64

मानं तनोषि, तदहम् अ[2]सामस्त्यैर्भावेन नतः सन् त्वयि बहुमानं श्रये। बहुमता[3]ऽभीष्टा त्वं मम[4] यदि लज्जया [वा] अन्यथा वा कियत् वक्त्रं विनम्य वर्त्तसे। हे चण्डि! तदा ते तव पदावधि पादौ यावन्नमामि॥ ॥१०८॥

प्रभुत्वभूम्नाऽनुगृहाण वा न वा प्रणाममात्राधिगमेऽपि कः श्रमः?।
क्व याचतां कल्पलताऽसि मां प्रति क्व दृष्टिदाने तव बद्धमुष्टिता?॥१०९॥

[1]प्रभुत्वभूम्नेति। त्वं मां प्रभुत्वस्य ऐश्वर्यस्य भूम्ना बाहुल्येन अनुगृहाण वा [प्रसीद वा] न वा अनुगृहाण मा [वा] प्रसन्ना भूः। परं[2] प्रणाममात्रस्य अधिगमेऽपि ग्रहणेऽपि तव कः श्रमः?। त्वम् अन्येषां याचताम्[3] अर्थिनां [क्व] कल्पलताऽसि कल्पवल्ली वर्त्तसे?। तव मां प्रति तु दृष्टेर्दानेऽपि बद्धमुष्टिता क्व कदर्यता क्व[4]?। क्वशब्दो[5] महत्यन्तरे[6] ॥१०९॥

स्मरेषुमाथं सहसे मृदुः कथं हृदि द्रढीयःकुचसंवृते तव।
निपत्य वैसारिणकेतनस्य वा व्रजन्ति बाणा विमुखोत्पतिष्णुताम्॥११०॥

[1]स्मरेषुमाथमिति। त्वं मृदुः अतिमृद्वी सती[2] स्मरस्य इषूणां माथं मथनं [3]कथं सहसे?। अथ वा तव हृदि द्रढीयोभ्यां कुचाभ्यां संवृते वैसारिणो मत्स्यः केतनं यस्य कामस्य बाणा निपत्य विमुखाः सन्त उत्पतिष्णुतां व्रजन्ति। वा[4] अथवा ततः पीडां न कुर्वन्ति।

2 R असाम॰ 3 P. बहुमानभावी 4 P. यदि मम —॥१०८॥
1 P. प्रभुत्व।; R प्रभुत्वेति। 2 P. om. परं 3 P. याचताम् 4 P., R om. क्व
5 P. नतिर्वै धर्म्यः 6 P. add. अघटमानत्वेन महा अन्तरे ॥१०९॥ 1 P. स्मरेषु।रे
2 P. add. कियत् 3 P. कथनं 4 P. इत्यपेक्षे इति प्रसिद्धत्वेन ततः —॥११०॥

[वैसारिणो मत्स्ये ( ? ) इत्यण्] ॥११०॥

स्मितस्य सम्भावय सृक्वणा कणान् विधेहि लीलाचलमञ्चलं भ्रुवः।
अपाङ्गरथ्यापथिकीं च हेलया प्रसद्य सन्धेहि दृशं ममोपरि ॥१११॥

[1] स्मितस्येति। हे दमयन्ति! त्वं सृक्वणा ओष्ठपर्यन्तेन स्मितस्य कणान् सम्भावय हास्यमात्रं कुरु[2]। तथा भ्रुवः[3] अञ्चलं प्रान्तं लीलाचलं विधेहि। तथा मम उपरि हेलया दृशं[4] दृष्टिम् अपाङ्ग एव रथ्या मार्गः तत्र पथिकीं[5] प्रसद्य प्रसादं कृत्वा सन्धेहि। प्रसह्य इति पाठे बलात्कारेण कटाक्षं मयि विधेहि ॥१११॥

समापय प्रावृषमश्रुविप्रुषां स्मितेन विश्राणय कौमुदीमुदः।
दृशावितः खेलतु खञ्जनद्वयी विकासि पङ्केरुहमस्तु ते मुखम् ॥११२॥

[1] समापयेति। त्वम् अश्रुविप्रुषां बिन्दूनां प्रावृषं[2] वर्षाकालं समापय निवारय। स्मितेन कृत्वा कौमुदी ज्योत्स्ना तस्या मुदः[3] विश्राणय देहि[4]। इतो मयि विषये दृशावेव[5] खञ्जनद्व(३४७)यी खेलतु क्रीडतु। ते [तव] मुखं विकासि[6] पङ्केरुहं पद्मम् [अस्तु] भवतु। वर्षानन्तरं शरदि ज्योत्स्ना भवन्ति। खञ्जना[7] आगच्छन्ति। कमलानि [च] विकसन्ति ॥११२॥

1 P. स्मितस्य। 2 P. add. सृजति लीलामिति सृक्वम्। क्वन्प्रत्ययः। तथा च माघः - जिह्वायुगलीढोभयसृक्वभागमाविसृक्विव्यक्ते ( ? )। तदाद्यन्ताभ्योऽपि दृश्यन्ते। क्वनिप्। वित्प्रत्यय इति अमरः। यथा - प्रान्तावोष्ठस्य सृक्वणी (II vi. 91) इति। इह तु कन् प्रत्यय एवोदितः। 3 P. भ्रुवो। 4 B दृशिं 5 P. पथिकं — ॥१११॥ 1 P. समापय। 2 B प्रावर्षं 3 B मुदे 4 B om. देहि 5 P. दृशेव 6 P. विकाशि 7 B चातकाः P. om. च — ॥११२॥

सर्ग ९ 66

सुधारसोद्वेल्लनकेलिभञ्जिरस्रजा सृजान्तर्मम कर्णकूपयोः।
दृशौ मदीये मदिराक्षि! कारय स्मितश्रिया पायसपारणाविधिम्॥११३॥

सुधारसेति[1]। मम कर्णकूपयोः अन्तः अञ्जिरस्य स्रजा। वाक्यमाल्या। सुधारसस्य उद्वेल्लनकेलिं सृज। अमृतं बहिर्निर्गमय। हे मदिराक्षि! निर्मलनेत्रे! मदीये दृशौ स्मितस्य श्रिया धवलया पायसस्य क्षीरोदनस्य पारणाया भोजनस्य विधिं कारय ॥११३॥

ममासनार्द्धे भव मण्डनं न न प्रिये! मदुत्सङ्गविभूषणं भव।
भ्रमाद् भ्रमादाल्पमङ्ग! मृष्यतां विना ममोरः कतर[1] त्वासनम्॥ १२
॥११४॥

ममासनेति[2]। त्वं मम आसनस्यार्द्धे मण्डनं भव उपविश। अथवा त्वं न [त्वं न]। निषेधद्वयमादरार्थम्। प्रिये! मम उत्सङ्गस्य विभूषणं भव। अथवा अहं [भ्रमात्] भ्रमात् भ्रान्त्या[3] [भ्रान्त्या] आसनार्द्धमुत्सङ्गं [च] बहिरङ्गम् उपवेशनम् आलपं[4] प्रलापं चकार। अङ्ग अहो मृष्यताम्[5]। त्वया सह्यतामपराधद्वयम्। तव मम उरःस्थलं[6] [विना] कतरदन्यदासनम्[7]?॥११४॥

अधीतपञ्चाशुगबाणवञ्चने! स्थिता मदन्तर्बहिरेपि चेदुरः।
स्मराशुगेभ्यो हृदयं बिभेतु न प्रविश्य तत्त्वन्मयसंपुटे मम॥११५॥

अधीतपञ्चाशुगेति[1]। हे[2] अधीतं पञ्चाशुगस्य बाण[3]-

[1] सुधारसो—॥११३॥ 1 P2 +कर्म कतम० 2 P1 ममासना। 3 P2 om. भ्रान्त्या
4 P2 om. आलपं 5 B मृष्य; P2 सत्यतां वा द्वयम् 6 P1 ममोरु० 7 B वान्तरद०
—॥११४॥ 1 P1 अधीता; P2 अधीतपञ्चेति। 2 P1 om. हे 3 P2 वारा०

सर्ग ९ 67

वञ्चनं यया तस्याः सम्बोधनम्। तथा त्वं मम अन्तर्मध्ये स्थिता सती
बहिर्भागो चेत् उरः [6]स्थिपि हृदयम् आसनीकृत्य आगच्छसि। तत् [7][ततो]
मम हृदये [8]त्वन्मयं यत् सम्पुटं [9]तत्र प्रविश्य [स्मरस्य आशुगेभ्यो बाणेभ्यो
न बिभेतु। मा भैषीत्। त्वया तावन्ममान्तः प्रविश्य] कामबाणाः वञ्चिताः।
अहमपि मध्ये बहिश्च त्वामेव सम्पुटं प्राप्य तेभ्यो न बिभेमि॥११५॥

परिष्वजस्वानवकाशबाणता स्मरस्य लग्ने हृदयद्वये [1]ऽस्तु नः।
इहा मम त्वत्कुचयोः कठोरयोरुरस्तटीयं परिचारिकोचिता॥११६॥

[4] [2]परिष्वजस्वेति। त्वं मां परिष्वज[3]स्वेति नोऽस्माकं
हृदयद्वये लग्ने सम्मिलिते तव मम च हृदि स्मरस्य अनवकाशबाणताऽ-
स्तु। अनवकाशबाणा यस्य [स तथा] तस्य भावस्तत्ता। इयं मम उरस्तटी
कठोरयोस्तव कुचयोः परिचारिका शुश्रूषापरा उचिता। यतो इहा[6]॥११६॥

तवाधराय स्पृहयामि यन्मधुस्स्रवैः श्रवःसाक्षिकमाक्षिका गिरः।
अधित्यकासु स्तनयोस्तनोतु ते ममेन्दुलेखाभ्युदयाद्भुतं नखः॥११७॥

[1]तवाधरायेति। अहं तव अधराय स्पृहयामि। यस्य

4 B सम्बोधने 5 B उपधि 6 B असेनी° 7 B ततो 8 B तन्मयं 9 B ddd. तन्मयेति
पाठे अधीतपञ्चाशुग[...]बाणवञ्चनामियं सम्पुटं —॥११५॥ 1 B ddd नौ
2 B परिष्वजस्व। 3 B om. इति 4 B हृदि हृदये 5 B ddd. त्वं चाऽहं च। त्यदा-
दीनि सर्वैर्नित्यमि (पा० १।। ७)ति त्यदादिभिरन्यैश्च सहवचने त्यदादीनि
नित्यं शिष्यते। त्यदादीनां मिथो यद्यत्परं तत् शिष्यते (पा० २म२)। इत्यस्मदो
हित्वे प्राप्तेऽस्मदो द्वयोश्चे (पा० १।। ५९)ति बहुवचनम्। 6 B ddd. अथवा परि-
चारिका कीलिकाया दार्ढ्यार्थं क्रियते। लोकोपचारा इति आशीः समं च॥११६॥

1 B तवाधराया; 2 तवेति।

मधुनः स्रवैः तव गिरः श्रवसः साक्षिकं कर्णप्रत्यक्षं माक्षिकं मधु यासां तास्तथाविधा वर्तन्ते । अस्मात् ओष्ठात् स्रुतेन मधुरत्वेन तव वाणीनां मधुभिः] तृप्तकर्णयोः । किञ्च तव स्तनयोः अधित्यकासु उपरितनभूमिषु/स्थ मम नखः इन्दुलेखाया अभ्युदयस्य अद्भुतम् आश्चर्यं करोतु । पर्वतोपरि चन्द्रस्य लेखा नखसदृशी भवति ॥११७॥

---

न वर्तसे मन्मथनाटिका कथं प्रकाररोमावलिसूत्रधारिणी।
तवाज्ञा हारे रुचिमेति नायकः शिखामणिश्च द्विजराड्विदूषकः ॥११८॥

---

न वर्तसे इति । त्वं मन्मथनाटिका कथं न वर्तसे ।
अपि तु कामदेवनाटिका कामं न वर्तयसि । किंभूता । प्रकारा प्रकारे रोमावलिरेव सूत्रं तत् धारयसीत्येवंशीला । अथ च नाटके सूत्रधारो नाटकाचार्यो भवति । अज्ञा ! तव हारे नायको महामणिः रुचिं शोभाम् एति प्राप्नोति । तथा शिखायां मुकुटे तव मणिश्च रुचिम् एति । किंभूतः । द्विजराजः चन्द्रस्य विशेषेण दूषकः दोषोत्पादकः । अथ च नाटके

---

२। श्रवसी साक्षिणी यस्य तच्छ्रवःसाक्षिकं मधु 3 B. स्रुतेन 4 B. °तृप्तः; P. °तृप्तिः 5 P. उपर°; P. P. om. °तन° 6 P. add. स्पृहेरीप्सितम् (पा° I.iv. 36) इति सम्प्रदानम् । उपाधिभ्यां त्यकन्नासन्नारूढयोः (पा° V.ii.34), न यासयोरि (पा° VII.iii.45) त्यत्र [त्यकन उपसङ्ख्यानादित्वाभावः । उपमया स्तनयोः शैशत्वम् (?) आक्षिप्यते । अनुप्रास उपमाऽतिशयोक्तिश्च ॥११७॥

1 P. नवर्तसे । 2 B. कोम 3 P. add. प्रकारा यासि। अथ च नाटिका नाम भरते ग्रन्थविशेषः 4 B. om. प्रकरा 5 P. °यति° 6 B. om. प्राप्नोति 7 P. add. अतोऽत्यर्थं द्विजानां राजानो ब्राह्मणः विदूषको नाम नायकः । 8 B. यथा

कथानायकः अङ्गाहारे नृत्ये शुचिम् अभिलाषं प्राप्नोति। तथा (१३५९)
द्विजानां राजा प्रधानो ब्राह्मणः विदूषको नाम नायकस्य मित्रं भवति॥११८॥

---

शुभाष्टवर्गस्त्वदलङ्गजन्मनस्त्वयाधरेऽलिख्यत यत्र लेखया।
मदीयदन्तक्षतराजिरञ्जनैः स भूर्जतामर्जतु बिम्बपाटलः॥११९॥

---

[1 .................................]॥११९॥

---

गिरानुकम्पस्व दयस्व चुम्बनैः प्रसीद शुश्रूषयितुं मया कुचौ।
निशेव चान्द्रस्य करोत्करस्य यन्मम त्वमेकासि नलस्य जीवितम्॥१२०॥

---

गिरानुकम्पस्वेति[1]। त्वं गिरा[2]नुकम्पस्व[3]। त्वं गिरा अनुकम्पां कुरु। चुम्बनैरनुगृहाण। मया कुचौ शुश्रूषयितुं प्रसीद। यत् यस्मात् असि त्वम् एकैव नलस्य जीवितम्। यथा निशा चान्द्रस्य कराणाम्[4] उत्करस्य जीवितं भवति। रात्रिं विना चन्द्रकिरणोत्करो[5] न भवन्ति[6][7]॥१२०॥

---

मुनिर्यथात्मानमथ प्रबोधवान् प्रकाशयन्तं स्वमसावकुत्स्यत[1]।
अपि प्रपन्नां प्रकृतिं विलोक्य तामवाप्तसंस्कारतयाऽसृजत्[2] गिरः॥१२१॥

---

१ B कथनीयः; P2 तथा 10 P1 add. शोभामेव ॥ P1 add. रूपकमतिशयोक्तिः श्लेषोऽपि ॥११८॥

1 P2 text only; 3 B P1 P2 om. com. — ॥११९॥

1 P1 गिरा; P2 गिरानुकम्पेति। 2 B गिरार्थयितुं 3 P1 om. अनुकम्पस्व त्वं गिरा; P2 add इति 4 B किरणानाम् 5 P2 उत्करो 6 P2 भवति 7 P1 add. मयेति कर्तरि तृतीया। अनुप्रासः काव्यलिङ्गमुपमाऽतिशयोक्तिश्च ॥१२०॥

1 P2 text व्ययतां 2 P2 text सृजन्

मुनिर्यथेति[3]। असौ नलोऽथ पश्चात् प्रकृष्टबोधयुक्तः[4] मोहविनाशे सति स्वम्[5] आत्मानं नलत्वं प्रकाशयन्तम्[6] अबुध्यत। मया उक्तृत्या कृतधर्मो नाशितः इति नलोऽजानात्[7]। ततश्च अवाप्तसंस्कारतया [पूर्वसंस्कारो] ताम् आत्मनः प्रकृतिं स्वाभाविकीम्[8] [अवस्थां] प्रपन्नां प्राप्तां[9] विलोक्य गिरो वाणीः असृजत उवाच। नलः क इव? यथा मुनिर्ब्रह्मवित् अनेकजन्मार्जितनित्याग्निहोत्रादिकर्माभ्यासेन[10] प्रत्यवायपरिहारेण काम्यनिषिद्धकर्मपरित्यागेन च नूतनकर्माभावात् अन्तःकरणशुद्ध्या, भोगेन वर्त्तमानदेहारब्धे[11] शुभाशुभे क्षपयित्वा[12] शमदमादिसाधनचतुष्टयसम्पत्त्या शास्त्राचार्यप्रसादात् प्रकृष्टबोधयुक्तो[13] ब्रह्मज्ञानवान् आत्मानं स्वप्रकाशं नित्यशुद्ध[14]बुद्धमुक्त[15]स्वभावं बुध्यते। श्रवणमनननिदिध्यासनैः अहं ब्रह्मास्मि (बृ. I.iv.10) इति प्रतिपद्यते[16]। तथा जन्मान्तरीयसंस्काराभ्यासेन च तां प्रसिद्धां प्रकृतिं सत्त्वरजस्तमसां साम्यावस्थां मायाम् अनादिमविद्यां प्रपन्नां[17] पृथग्भूतां विलोक्य अहं मनुरभवं सूर्यश्चाहं[18] कक्षीवान् ऋषिरस्मि विप्रः[19]। अहं कुत्समार्जुनेयं[20] न्यृञ्जेऽहं कविरुशना पश्यता[21] मा॥ इत्यादि ऋग्वेद (IV. 26.1) प्रसिद्धा ऋचः। वामदेवऋषिवन्मुक्तः सन् पश्यन् वदति[22] ॥१२१॥

---

3 P. मुनिर्यथा। 4 R. ०विधि० 5 P.R. आत्मानं स्वं 6 P. प्रकाशकत्वं 7 P. ०जानन् 8 P. ०विकां 9 P.R. प्राप्तां प्रपन्नां; R.– अवस्थां 10 B. ०केना० 11 P. ०रम्भ- प्रारब्धे 12 B.P. क्षिप० 13 R. ०युक्ते 14 B. नित्यं 15 R. om. बुद्ध० 16 R. रपिपद्येते 17 P.R. प्रयत्नां 18 P. मुनि० 19 P. विप्रोऽहं 20 P. कुत्समार्जुनियं 21 R. पश्यतां 22 P. add. अथ च तां प्रपन्नां प्रकृतिं विलोक्य पापि (पूर्व) प्रबोधेऽपि संस्कारानुवृत्तेर्मूढवदेव गिरोऽसृजत। पूर्ववदेव कानिचिद् व्यांस्यु (वचांस्यु) वाच। जीवन्मुक्तोऽपि प्रकृतिपुरुषभेदज्ञानेऽपि पूर्वसंस्कारवशात् बुद्धिकर्मेन्द्रियव्यापारान् करोति। गिरां सर्जनमिन्द्रियव्यापारोपलक्षणम्। अथ अये मयात्मे (IX. 122)-त्यारभ्य श्लोकपञ्चकस्य (IX. 123) नलवाक्यत्वमिति स्वयं मोहे महोर्मिनिर्मितं प्रकारान्तं शोचतीत्यनेनाक्षिप्तम् इत्यपि व्याख्यान्तरम्। उपमा अनुप्रासश्लेषावपि॥१२१॥

अये! मयात्मा किमनिह्नुतीकृतः किमत्र मन्ता स नु मां शतक्रतुः।
पुरः स्वभक्त्याऽथ नमन् ह्रियाऽऽविलो विलोकिताऽनेन तदिङ्गितान्यपि॥१२२॥

[1] अये ममात्मेति। अये। मया आत्मा किम् अनिह्नुतीकृतः प्रकटीकृतः? मोहेनात्मानमहं किं प्रकटितवान्। अत्रार्थे नु पुनः स[2] शतक्रतुरिन्द्रः मां किं मन्ता? कुत्सितं कीदृशं वा ज्ञास्यति। अहं दूतधर्मं त्यक्त्वा पुरः [3]प्रथमं स्वभक्त्या प्रणामादिप्रह्वीभावेन नमन् सन् अथ पश्चात् अकृतकार्यत्वात् ह्रिया आविलः कलुषितः नमन् तस्येन्द्रस्य इङ्गितान्यपि कुपितादिचेष्टितान्यपि न विलोकिताहे[4]॥१२२॥

स्वनाम यन्नाम मुधाभ्यधामहो महेन्द्रकार्यं महदेतदुज्झितम्।
हनूमद[2]द्यैर्यशसा मया पुनर्द्विषां हसैर्दूत्यपथः सितीकृतः॥१२३॥

[1] स्वनाम यन्नामेति। यदहं स्वनाम मुधा वृथा अभ्यधाम्। दमयन्त्यग्रेऽवोचम्[2]। [नाम[3] अहो] एतत् महत् महेन्द्रस्य कार्यम् उज्झितम्। पूर्वं हनूमत्प्रभृतिभिर्दूतैर्दूत्यस्य पन्थाः यशसा सितीकृतः। मया पुनर्द्विषां द्वेषपराणां हसैः हतत्वमार्गो धवलितः॥१२३॥

धियात्मनस्तावद[1]चारु नाचरं परस्तु तद्वेद स यद्वदिष्यति।
जनावनायोद्यमिनं जनार्दनं अये जगज्जीवपिबं शिवं वदन्॥१२४॥

[2]धियात्मन इति। तावदहम् आत्मनो धिया बुद्ध्या

1 P. अये मया। 2 P. om. स 3 P. पूर्वम् अथपाठगतः 4 P. add. अनुप्रासः काव्यलिङ्गं च॥१२२॥ 1 P. स्वनाम; B. स्वनामेति। 2 P. add. भूतार्थतने लङ्(लुङ्)(पा० III. ii. 110) 3 B. P. om. नाम; edt. add. नाम—॥१२३॥ 1 P. + ext. ०साधु 2 P. धियात्मन।—

बुद्धिपूर्वकम् अचारु देवानामनिष्टं न आचरम्। एवं सति स परो लोकः
एतत् विरूपं वा अन्यथा वदिष्यति तत्पर एव वेद जानाति। किं कुर्वन्?।
परः शत्रुर्वा लोको वा जनानाम् अवनाय पालनाय उद्यमिनं देवं श्री(356)-
कृष्णं जनानाम् अर्दनं पीडाकरं वदन् तस्य जनार्दन इति नाम कृतम्।
परः पुनः किं कुर्वन्?। परः क्षये कल्पान्ते जगतां जीवानां प्राणानां [पिबं]
रुद्रं संहारकारकं शिवं नाम्ना वदन् कल्याणकरं वदन्। [पाघ्राध्मा-
धेट्दृशः शः (पा० ३।१।१३७) इति शप्रत्ययः] ॥१२४॥

---

स्फुरत्यदः किं हृदयं त्रपाभराद्यदस्य शुद्धिर्विबुधैर्विबुध्यताम्।
विदन्तु ते तत्त्वमिदं तु दन्तुरं जनानने कः करमर्पयिष्यति?॥१२५॥

---

स्फुरत्यदः किमिति। अदो मम हृदयं किं त्रपाया
भरात् स्फुरति दीप्यते?। यत् यस्मात् अस्य मनसः शुद्धिर्विबुधैर्देवैः अथ
च दक्षैः विशेषेण बुध्यताम्। तु पुनः इदं दन्तुरं विषमं दुर्ज्ञेयं तत्त्वं
सत्यं परमार्थं ते देवाः विदन्तु जानन्ति। जनानाम् आनने कः करं
हस्तम् अर्पयिष्यति? देवाः सर्वज्ञत्वात् मम निरपराधतां जानन्तु। लोकं
परापवादिनं को मुखं पिधाय वारयिता॥१२५॥

---

3 R इत्यथा 4 P, om. देवं श्रीकृष्णं 5 P R परेण 6 P, परं; R om. वदन् कल्या-
णकरं 7 P, add तथा च — कोऽप्येवमेवोपगताः प्रसिद्धिं गुणाद्धि को नाम
मुखं जनानाम्। जात्येव ये वायुभुजो विकर्णास्तान् भोगिनः कुण्डलिनो
वदन्ति॥( ? )॥ अनुप्रासो हेतुश्च॥१२४॥ 1 P, स्फुरति; R स्फुरतीति।
2 R मे मम 3 P, त्रपाया भरात् किं; R om. किं 4 P, दन्तुरितमित्युच्चारणे सम्ब-
ध्यते; and om. दन्तुरं ... अर्पयिष्यति 5 P, add. ते 6 R परापवादवादिनं 7 P,
वारयति and add. अनुप्रासोऽतिशयोक्तिर्हेतुरनुमानं च ॥१२५॥

मम श्रमश्चेतनयाऽनया फली बलीयसाऽल्लोपि च सैव वेधसा।
न वस्तु दैवस्वरसाद्विनश्वरं सुरेश्वरोऽपि प्रतिकर्तुमीश्वरः॥१२६॥

[1] मम श्रम इति। मम श्रमः आयासः दूतत्वम् अनया चेतनया फली सफलो भवति[2] वेधसा दैवेन बलीयसा मम सैव चेतना अल्लोपि च[3] लुप्ता। ग्रपिल्लोऽहं कृतः। यतो दैवस्य स्वरसात् स्वभावात् विनश्वरं वस्तु सुरेश्वरोऽपीन्द्रोऽपि प्रतिकर्तुं स्थापयितुं न ईश्वरः न समर्थः[4]॥१२६॥

इति स्वयं मोहमहोर्मिनिर्मितं प्रकाशनं शोचति नैषधे निजम्।
तथा व्यथामग्नतदुद्दिधीर्षया दयालुरागाल्लघु हैमहंसराट्॥१२७॥

[1] इति स्वयमिति। इति अमुना प्रकारेण नैषधे[2] नले स्वयं मोहमहोर्मिनिर्मितं [निजं प्रकाशनम् आत्मप्रकरनं शोचति सति] लघु शीघ्रं दयालुर्दयावान् सौवर्णो हंसराट् स एव आगात् आगात्। कथा![3] हैमो तथा[4] तेन] प्रकारेण व्यथायां मग्नस्य तस्य नलस्य उद्दिधीर्षया उद्धर्तुमिच्छया[5]॥१२७॥

नले स तत्पक्षरवोर्ध्वदीक्षिणां स एव पक्षीति भयान्नमभ्यधात्।
नयादयैनामिति मा निराशतामसून् विहातेयमतः परं परम्॥१२८॥

1 P. श्रमः। 2 P. बलीयसा here 3 P. P2 om. च 4 P. add. शकमूर्धपे– (पा० III.1.85) इत्यादिना लुमुन्। अनुप्रासोऽर्थान्तरन्यासश्च॥१२६॥
1 P. इति स्वयम्। P2 इतीति। 2 B नैषधेन नलेन 3 B P. P2 om. हैमो; add. हैमो M P2 om. तथा 5 P. add. अनुप्रासः काव्यलिङ्गमतिशयोक्तिश्च॥१२७॥

[1] नल स नलभोति। स हंसः नलम् अभ्यधात् उवाच। किं[2] भूतम्? । तस्य [हंसस्य] पक्षरवेण ऊर्ध्वं वीक्षिणम्। तथा एव स एव पूर्वोपिकारी] पक्षी[4] इति भणन्तम्। हे अदय! एनां दमयन्तीम् अतिशयेन निराशताम् आशारहितत्वं मा नय मा प्रापय। अतः परम् इयं पर् केवलम् असून् प्राणान्[5] विहाता त्यक्ष्यति[6] ॥१२८॥

सुरेषु पश्यन्निजसापराधतामियत्प्रयस्याऽपि तदर्थसिद्धये।
न कूटसाक्षीभवनोचितो भवान् सतां हि चेतःशुचिताभसाक्षिका ॥१२९॥

[1] सुरेषु पश्यन्निति। भवान् कूटसाक्षीभवनोचितो [2] [नास्ति]। किं कुर्वन्? । सुरेषु निजस्याऽऽत्मनः सापराधतां पश्यन्। किं कृत्वा। तेषामर्थसिद्धये इयत् एतावत् घनतरं प्रयस्य प्रयासं कृत्वाऽपि। हि यस्मात् सतां महात्मनां चेतः[4]शुचिता [मनसो निर्दोषत्वम्] आत्मसाक्षिका। न परसाक्षिका। तस्मात्तव साक्षित्वं[5] कूटं न भवति[6] त्वं मा भैषीः[8]। तथा च स्मृतिः - यमो वैवस्वतो देवो यस्तवैष हृदि स्थितः। तेन चे[9]दविवादस्ते मा गङ्गां मा कुरून् गमः (मनु VIII.92) ॥ इति। तव चित्तं निर्मलं देवा एव जानन्ति। कथं 'जनानने कः करमर्पयिष्यति' (IX.125) - ति वदसि। तथा 'परस्तु तद्वेद स यद्वदिष्यति' (IX.124) त्यपि न वाच्यम्। ।ती ॥१२९॥

1 P. नलं स; P2 नलभिति। 2 P. किं भूते तस्य twice 3 P. वीक्षणे 4 P. om. पक्षी 5 P2 add. अपि 6 P. add. अनुप्रासः ॥१२८॥ 1 P. सुरेषु। 2 P. न भवति; P2 om. ना० 3 P. om. सतां 4 P2 चित्त: 5 P. कूटसाक्षित्वं 6 P2 भवसि 7 P. add. पश्यन्निति, लक्षणहेत्वोः क्रियायाः (पा० III.ii.126) इति शतृप्रत्ययः। सापराधित्वदर्शनं कूटसाक्षीभवनस्य जनकं भवनोचितं यत स्वं चेतःशुचितायाः साक्षी। साक्षीति [साक्षाद्] द्रष्टरि [संज्ञा] साक्षाद्योमि (पा० V.ii.91) तीन प्रत्ययः। जनापवादादपि च 8 P. भैः 9 B वेद; P2 वेदे 10 P. add. अनुप्रासः काव्यलिङ्गमर्थान्तरन्यासश्च ॥१२९॥

इतीरणाऽऽपृच्छ्य नलं विदर्भजामपि प्रयातेन खगेन सान्त्वितः।
मृदुर्बभाषे भगिनीं दमस्य स प्रणम्य चित्तेन हरित्पतीन्नृपः॥१३०॥

---

इतीरणापृच्छ्येति[1]। स [नृपो][2] नलः चित्तेन हरितां दिशां पतीन् देवान् प्रणम्य मृदुः सन् दमस्य भगिनीं भैमीं बभाषे। किंभूतः? इति ईरणा उक्तवता खगेन हंसेन सान्त्वितः [प्रियमुक्तः]। किंभूतेन? नलं विदर्भजामपि उभयम् आपृच्छ्य [प्रयातेन][3] प्रयातुमारब्धेन[4]॥१३०॥

---

ददेऽपि तुभ्यं कियतीः कदर्थनाः सुरेषु रागप्रसवावकेशिनीः।
अदम्भदूत्येन भजन्तु वा दयां दिशन्तु वा दण्डममी ममाऽऽगसा॥१३१॥

---

ददेऽपि तुभ्यमिति[1]। अहं हे भैमि! तुभ्यमपि कियतीः बह्वीः कदर्थनाः उक्तिप्रयुक्तिरूपाः ददे दत्तवान्। किंभूताः? सुरेषु विषये रागोऽनुरागः स [एव] प्रसवः कुसुमं तत्र अवकेशिनीः फलरहिताः। यथा त्वं रागं कुरुषे तथा मयोक्तं परं नि:(१३६७)फलं जातम्[2]। ततोऽदम्भेन दम्भरहितदूत्येन[3][4] अमी देवा दयां [वा] भजन्तु। वा अथवा मम आगसा अपराधेन दण्डं वा दिशन्तु[5]॥१३१॥

---

अयोगजामन्वभवं न वेदनां हिताय मेऽभूदियमुन्मदिष्णुता।
उदेति दोषादपि दोषलाघवं कृशत्वमशानवरादिवैनसः॥१३२॥

---

1 P. इतीरणा; P2 इतीरणेति। 2 P2 om. नृपो 3 Bl. P2 om. प्रयातेन; ed2. add. प्रयातेन 4 Bl. add. सेवातस्य हि लोकेन न दोषान्वेषणं अणम्। शिवलोकस्य संस्थाने कस्यां सभ्यत्वभावने(वामन ...) इति वचनात्। भगिनीं विना अश्लीलम्। तुल्ययोगिता॥१३०॥ 1 P. ददेऽपि। 2 P. add. वर्तमाने वा, ददे क्रियापदम्। कियतीर्ददे। अपि तु अतः परं न कदर्थयामि। 3 B2 रहिते 4 P. add. दूतकर्मणा 5 P. add. अतिशयोक्तिः॥ ॥१३१॥

सर्ग ९ 76

अयोगजामिति। मम इयम् उन्मदिष्णुता ग्रहिलता हिताय श्रियार्थम् अभूत् । यतोऽहं तव संयोगे अयोगाद्विरहाज्जातां वेदनां पीडां न अन्वभवम् । उक्तोऽयमर्थः। दोषादपि मोहलक्षणात् दोषस्य विरहदुःखस्य लाघवम् अल्पत्वम् उदेति। कस्येव? एनस इव। यथा अज्ञानवशात् कृतस्य एनसः पातकस्य कृशत्वं स्वल्पत्वं भवति। बुद्धिपूर्वकं कृतं पातकं द्विगुणेन प्रायश्चित्तेन शुध्यति। अबुद्धिपूर्वकम् एकगुणेन [प्रायश्चित्तेन शुध्यति]। अज्ञानात् दोषात् पापस्य [दोषस्य] लाघवं प्रायश्चित्तलघुत्वं भवति। तथा च ब्रह्महत्याप्रायश्चित्तम् अकामाद् ब्राह्मणं हत्वा द्वादशवर्षाणि आत्मनः पापं प्रकाशयन् कपालभिक्षाशी अन्यैश्च नियमैर्नियतेन्द्रियः शुध्यति। कामात्तु हत्वा द्विगुणेन प्रायश्चित्तेन शुध्यति वा न वा। [तदुक्तम् - प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत्। कामतो व्यवहार्यस्तु वचनादिह जायते (याज्ञ 226)] ।।१३२।।

न वेत्त्ययोगस्मरपावकोऽपि मे कदर्थनात्यर्थलयाऽगमद्द्याम् ।
प्रकाशमुन्माद्य यदद्य कारयन्मयात्मनस्त्वामनुकम्पते स्म सः ।।१३३।।

न वेत्त्ययोगेति। अयोगस्मरपावकोऽपि वियोगानलोऽपि मे मम [इति] कदर्थनायाम् अत्यर्थलग्नः दयां न वा किम् अगमत्। वा अथवा दयां न चकार। यत् अद्य माम् उन्माद्य [मया]

1 B अस्यामजामिति; P अयोगजाम् । 2 P ग्रहिलता 3 BP तव संयोगे omit अन्वभवं 4 B एकवशात्; P मोहादि 5 P दुःखस्य 6 P विरहादि 7 P अथ च 8 P add अर्थान्तरन्यास उपमा च ।।१३२।।

1 P न वेति। 2 P add अनेन प्रकारेण 3 BP add किं 4 P add तवेत्त्ययोगेति पाठे तव त्वत्सम्बन्धी अयोगस्मरपावक इति सम्बन्धः।

सर्ग ९ 

आत्मनः प्रकाशं कारयन् मम पार्श्वादात्मानमेव प्रकटं कारयन् सन् स विरहस्मराग्निर्माम् अनुकम्पते स्म[6] ॥१३३॥

अमी समीहैकपरास्तवाऽमराः स्वकिङ्करं मामपि कर्तुमीशिषे।
विचार्य कार्यं सृज मा विधान्मुधा कृतोऽनुतापस्त्वयि पार्ष्णिविग्रहम् ॥ ॥१३४॥

[1]अमी इति। अमी अमरास्तव समीहायाम् इच्छायाम् एकपराः एकनिष्ठाः त्वत्कामुकाः। त्वमपि मां स्वकिङ्करं निजं भृत्यं कर्तुम् ईशिषे[2]। त्वं विचार्य कार्यं मदङ्गीकारलक्षणं सृज[3] कुरु। पश्चात्त्वया कृतोऽनुतापः[4] पश्चात्तापः त्वयि विषये मुधा वृथा पार्ष्णिविग्रहं मा विधात् मा कार्षीत्। मयि कृते[5] सति पार्ष्णिग्राहो विग्रहकारी पश्चात्तापस्तव [यथा[6] न[7]] भविष्यति ॥१३४॥

उदासि[सी]तेनैव मयेदमुच्यसे[1] भिया न तेभ्यः स्मरतानवान्नवा।
हितं यदि स्यान्मदसुव्ययेन ते तदा तव प्रेमणि शुद्धिलब्धये ॥१३५॥

[2]उदासि[सी]तेनेति। मया त्वम् उदासि[सी]तेन इव [उदासीनेन][3] इदम् उच्यसे[4]। न तेभ्यो देवेभ्यो भिया। न वा स्मरस्य तनुत्वात् [कृश-

5 P₂ om. सन् 6 P₁ add. प्रकाशं कारयन् इत्यनुकम्पेन हेतुः। मयेति कर्तरि तृतीया। आत्मनेति ममैव योगस्मरपावकस्येत्यपि व्याख्यान्तरम्। अनुप्रास उक्तविशेष आक्षेपो हेतुरनुमानमतिशयोक्तिः ॥१३३॥ 1 P₁ अमी।; P₂ अमी समीहैकेति। 2 P₁ add. शकधृषे (पा० III. iv. 65) त्यादिना तुमुन् 3 P₁ add. त्वं 4 P₁ add. कृतस्य कार्यस्य वाऽनुतापः 5 B P₂ मयि वृते सति at the end 6 P₂ न यथा 7 P₁ भवति; and add. अनुप्रासोऽतिशयोक्तिश्च ॥१३४॥ 1 P₂ text उच्यते 2 P₁ उदासित।; P₂ उदासीति। 3 P₁ add. इव 4 P₁ add. उदासितेनैवेति पाठान्तरम्।

त्वात् अभाववशाद्वा मया त्वं मोच्यसे। यदि ते तव मम असूनां प्राणानां व्ययेन त्यागेन हितं स्यात्, तदा तव प्रेमणि स्नेहे शुद्धिः लब्धिर्वा भवति। त्वदनुरागस्याऽऽनृण्यं भवति॥१३५॥

---

इतीदृशैर्नैषधसूनृतामृतैर्विदर्भजन्मा भृशमुल्ललास सा।
ऋतोरधिश्रीः शिशिरानुजन्मनः पिकस्वरैर्दूरविकस्वरैर्यथा॥१३६॥

---

इतीदृशैरिति। सा विदर्भजन्मा दमयन्ती इति ईदृशैः नैषधस्य सूनृतामृतैः प्रियवचनैः भृशम् उल्ललास। यथा शिशिरानुजन्मनो वसन्तस्य ऋतोः अधिश्रीः अधिका शोभा दूरम् अतिशयेन विकस्वरैः [पिकानां कोकिलानां स्वरैः] भृशमुल्लसति॥१३६॥

---

नलं तदावेत्य नमाशये निजे घृणां विगानं च मुमोच भीमजा।
जुगुप्समाना हि मनो धृतं तदा सतीधिया दैवतदूतधावि सा॥१३७॥

---

नलं तदेति। भीमजा घृणां जुगुप्सां विगानं च आत्मनो निन्दां च मुमोच। तं तदा नलं निजे आशये अवेत्य। हि यस्मात् तदा सा आत्मीयं मनः जुगुप्समाना अभूत्। किंभूतम्? दैवतदूतं भणित्वा

---

5 P. add. उभयथा ह्युदासीनवचनसम्भवो अथवा अमी समीहन्ति, न देवभयात् उच्यते। स्वकिङ्करमिति न स्मरजनितान् नवान् कृशत्वात् कामकदर्थनात्। किन्त्वौदासीन्यमेवाऽशोतिमो(?) वाच्यते। 6 P. om. प्राणानां 7 P. om. तदा 8 B शुद्धिः; P. शुद्धो 9 B ऽनृणो 10 P. om. भवति, and add. अनुप्रासोऽतिशयोक्तिरुपमा चायथासङ्ख्यमपि॥१३५॥
1 P. इतीदृशैः 2 P. पिकस्वरैः —॥१३६॥ 1 P. नलं तदा 2 P. add. निजे आशये 3 P. add. मनसि 4 B निजे alt. चित्ते; P. निजे alt. अवेत्य
5 P. देवदूतं —

धावती (36b) त्येवं शीलम् । किंभूतं मनः ? । सतीधिया इत्व पतिव्रताबुध्या अवस्थितम् । अहं सती देवदूतं प्रति मम मनो गतम् इति आत्मानं निन्दन्ती लोऽयमिति मत्वा सहर्षा जाता ॥ १३७ ॥

---

मनोभुवस्ते भविनां मनः पिता निमज्जयन्नेनसि तन्न लज्जसे ।
अमुद्रि सत्पुत्रकथा त्वयेति सा स्थिता सती मन्मथनिन्दिनी धिया ॥ १३८ ॥

---

मनोभुव इति[1] । सा दमयन्ती इति प्रकारेण मन्मथं निन्दती सती स्थिता । कया ? । धिया बुध्या कृत्वा[3] हे मन्मथ ! ते तव भविनां संसारिणां मनः पिता तस्मात्त्वमुत्पद्यसे । किंविशिष्टस्य ? । मनोभुवः चेतसो[4] जातस्य । त्वं तन्मनः एनसि पातके[5] देवदूतकामुकत्वलक्षणे[6] निमज्जयन् सन्[7] किं न लज्जसे ? । ततस्त्वया हे स्मर ! सत्पुत्रकथा अमुद्रि नाशिता । सत्पुत्राः पितरं पापे न मज्जयन्ति । इत्थं निनिन्द ॥ १३८ ॥

---

प्रसूनमित्येव तदङ्गवर्णना न सा विशेषात् कतमत्तदित्यभूत् ।
तथा कदम्बं तदवर्णि लोमभिर्मुदम्बुना[1] प्रावृषि हर्षमागतैः ॥ १३९ ॥

---

प्रसूनमितीति[2] । पूर्वं तस्या अङ्गस्य वर्णना इत्येव एतावती एवाऽभूत् यत् दमयन्त्या अङ्गं प्रसूनं पुष्पसदृशमिति सा वर्णना इति विशेषान्नाऽभूत् । इतीति किम् ? । यत् कतमत् पुष्पं तस्याः अङ्गम्

---

6 P. om. सती० .... सहर्षा जाता ॥ १३७ ॥

1 P. om. मनोभुव इति । 2 P. मनोभवस्थिता । कया । 3 P. add. मनोभुवः सा सती दमयन्ती इति प्रकारेण मन्मथनिन्दिनी स्थिता । इति किम् ? । 4 P. चेतो- जातस्य 5 P. पापे 6 P. °पातकत्व° 7 R. om. सन् —— ॥ १३८ ॥

1 R. add मुदश्रुणा 2 P. प्रसूनम् ।; R. प्रसूनमिति । ~~[struck out]~~

सर्ग ९ 80

इति विशेषो न लब्धः। परं तदा तदङ्गं लोमभिः रोमाञ्चेन[3] कदम्बं वत्सर-
शाम अवापि।[4] किंभूतैः? दृशो: अम्बुना अश्रुणा कृत्वा[5] प्रावृषि [जातायां] श्रु
हर्षे रोमाञ्चमागतैः। वर्षासु किल कदम्बाः पुष्पन्ति]॥१३९॥

मयैव सम्बोध्य नलं चलापि यत् स्वमाह मद्युद्गमिदं विमृश्य तत्।
असाविति भ्रान्तिमसाद्दमस्वसुः स्वभाषितस्वोद्गमविभ्रमक्रमः॥१४०॥

[मयैव सम्बोध्येति] स्वेन नलेन भाषितो यः स्वकीय
उद्गमस्य चित्तवैकल्यस्य विभ्रमो विलासस्तस्य क्रमः परिपाटी[2] दम-
स्वसुः इति भ्रान्तिम् [असात् अपनिनाय। षोऽ(१२२२) न्तकर्मणि। [अशा-
दिति पाठे] अशात् निरस्यति स्म। शो (१२२०) तनूकरणे। अद्यतनी (लिं है०
व्या० ३।४।६५)। घ्राशाच्छासाधेटां वा वक्तव्यम् इति सिचो लोपः।
इतीति किम्? मयैव यत् नलं सम्बोध्य नलनाम गृहीत्वा चलापि।
असौ नलः तत् विमृश्य स्वम् आत्मानं [इदं] नल[रूपम्] आह। किं
विशिष्टम्?। मत्संस्कारात् उद्गमम् जातम्। इति भ्रान्तिं दमयन्ती
निराचकार। अयं देवदूतो नलो न[4] भवति [इति शङ्का अपगता। यतोऽ-
यं नलो न स्यात्। तत्कथमधुना मम प्रत्यक्षं विरहेण उद्गमविभ्रम-
वशात् इत्थं ग्रथिलो[5] भवेत्]। किन्तु नलानुरक्तां मां बुद्ध्वा आत्मानं
नलं कथयति। तस्मान्नल एवायमिति॥१४०॥

3 P. om. रोमाञ्चेन.... अवापि। किम् M P2 om. किंभूतैः?। 5 P. add.
मदश्रुणोति पाठान्तरम् — ॥१३९॥

1 P. मयैव।; P2 मयैवेति। 2 P. add. अथवा स्वभाषितः स्वोद्गमविभ्रमो
येनेत्यन्यपदार्थो नलो। 3 P. add. सुभाषितेति सुभाषितेति च पाठा-
न्तरे M P2 om न भवति... यतोऽयं नलो 5 P3 om. ग्रथिलो भवेत् — ॥१४०॥

विदर्भराजप्रभवा ततः परं त्रपासखी वक्तुमलं न सा नलम्।
पुरस्तमूचे ऽभिमुखं यदत्रपा ममज्ज तेनैव महाह्रदे ह्रियः ॥१४१॥

---

विदर्भराजेति[1]। ततः परं[सा][2] विदर्भराजप्रभवा नलं वक्तुम् अलं समर्था नाऽभूत्। किंभूता[3]? त्रपासखी लज्जायुक्ता। किञ्च यत्[4] पुरः[5] पूर्वं प्रथमं[6] देवदूतोऽयमिति मत्वा अत्रपा निर्लज्जा सती अभिमुखं स्थिता[7] यदूचे उक्तवती[8], तेनैव ह्रियो लज्जाया महाह्रदे दमयन्ती ममज्ज[9]। अगेतनं यदुक्तं तस्य महान् पश्चात्तापोऽभूत् ॥१४१॥

---

यदाऽपवार्याऽपि न दातुमुत्तरं शशाक सख्याः श्रवसि प्रियाय सा।
विहस्य सख्येव तमब्रवीत्तदा ह्रियाऽधुना मौनधना भवत्प्रिया ॥१४२॥

---

यदाऽपवार्याऽपि [इति][1]। यदा सा दमयन्ती अपवार्य सर्वजनप्रत्यक्षं कृत्वाऽपि सख्याः श्रवसि कर्णे लगित्वा प्रियाय नलाय उत्तरं दातुं न शशाक। तदा सखी एव विहस्य तम् अब्रवीत् — इयं भवतः प्रिया अधुना ह्रिया कृत्वा मौनधना मौनिनी वर्त्तते ॥१४२॥

---

पदातिथेयाँ[1] ल्लिखितस्य ते स्वयं विलम्बती लोचननिर्झरानियम्।
अगाद यां सैव मुखान्मम त्वया प्रसूनबाणोपनिषन्निशम्यताम् ॥१४३॥

---

पदातिथेयानिति[2]। इयं दमयन्ती लिखितस्य[3] ते

---

1 P₁ विदर्भा; P₂ विदर्भेति। 2 P₂ om. सा 3 P₁ add. विदर्भजा 4 P₁ om. यत 5 P₁ पुरा 6 P₁ om. प्रथमं 7 BP₂ अभिमुखं स्थिता alt. उक्तवती 8 P₁ om. यदूचे उक्तवती 9 BP₂ ममज्ज दमयन्ती — ॥१४१॥ 1 P₁ यदापा; P₂ यदेति। — ॥१४२॥
1 P₁ add. नतिथेयाल्लिखि॰ 2 P₁ पदाति; P₂ पदेति। 3 P₂ आलिखितस्य —

तव पद्योः आतिथेयान् अतिथिपूजा[4]रूपान् लोचनयोर्निर्झरान् अश्रु-प्रवाहान् वितन्वती सती यां कामस्य] उपनिषदं रहस्यभूतां सारभूताम् [उपालम्भगर्भगिरं] जगाद । सैव प्रसूनबाणस्य उपनिषत् उद्दीपि[का] कामाद्वैतप्रतिपादि[का] उपालम्भगर्भवचन]परम्परा[6] मम मुखात् निशम्य-तां श्रूयताम् ॥१४३॥

असंशये से त्वयि हंस एव मां शशंस न त्वद्विरहाप्तसंशयाम् ।
क्व चन्द्रवंशस्य वतंस! मद्वधान्नृशंसता सम्भविनी भवादृशे ॥१४४॥

[1]असंशयमिति । असंशये स सौवर्णो हंस (1370) एव मां त्वयि विषये तव विरहात् आप्तप्राण[2]संशयां न शशंस । हे चन्द्रवंशस्य वतंस! मुकुटभूत! भवादृशे पुरुषे मम व[3]धात् नृशंसता क्रूरता क्व सम्भ-विनी न सम्भवति । तस्मात् हंसो न कथितवान् ॥१४४॥

जितस्त्वयाऽऽस्येन विधुः स्मरः श्रिया कृतप्रतिज्ञौ [1]मम तौ वधे कृतः? ।
तवेति कृत्वा यदि तज्जितं मया न मोघसङ्कल्पधराः किलाऽमराः ॥१४५॥

[2][जितस्त्वयेति]। त्वया आस्येन विधुर्जितः । श्रिया कृत्वा स्मरस्त्वं] जितः । ततो द्वावपि चन्द्रकामौ मम वधे कुतः [कथं] कृत-प्रतिज्ञौ? । मया किं तयोर्वि[3]नाशितम् । यदि तव सक्ता सम्बन्धिनी अहं तिष्ठामि इति कृत्वा मां पीड[4]यतः, तत् मया जितम् । किल अमरा देवाः मे[5]

4 P/P2 ०सपर्या° 5 P. om. ०वचन° 6 P. add. त्वया —॥१४३॥ 1 P. असंशयम् । 2 P. ०प्राप्त° 3 P. वत —॥१४४॥ 1 B text मम° 2 P. जितः । 3 P. add. त्वो प्रतिपक्षं कर्तुम् अशक्तौ विधुस्मरौ यथाऽनीके अभियोज्यते तत्प्रति-निधिभूतं किमप्यभियुज्यते, तद्वत् । 4 P. पीडयति 5 B अमोघं ———

मोघं निष्फलं सङ्कल्पं] धरन्ति। एतौ च देवौ एताभ्यां च[6] सक्ताऽहं[7] चित्ते धृता[8]। ततो जितं मयेति। [अकर्मकेन जयति वा दमयन्त्या अ[9]नियत उत्कर्षः प्रतिपाद्यते]॥१७५॥

---

निजांशुनिर्दग्धमदङ्गभस्मभिर्मुधा विधुर्वाञ्छति लाञ्छनोन्मृजाम्।
त्वदास्यतां यास्यति तावताऽपि किं वधूवधेनैव पुनः कलङ्कितः॥१७६॥

---

[1]निजांशुनिर्दग्धेति। विधुर्निजैः अंशुभिः निर्दग्धं य[2]त् मदङ्गं तस्य भस्मभिर्मुधा आत्मीयस्य लाञ्छनस्य उन्मृजाम् [अपनयनम्] उज्ज्वालनं वाञ्छति। तावताऽपि कृतेन किम[4] अयं चन्द्रः तव आस्यतां वक्त्रतां यास्यति। पुनः पुनरपि यतः व[5]धूनां वधेनैव कलङ्कितः॥१७६॥

---

प्रसीद यच्छ स्वशरान् मनोभुवे स हन्तु मां तैर्धुतकौसुमाशुगः।
त्वदेकचित्ताऽहमसून् विमुञ्चती त्वमेव भूत्वा तृणवज्जयामि तम्॥१७७॥

---

[1]प्रसीद यच्छेति। हे नल! त्वं प्रसीद। स्वकीयान् शरान् मनोभुवे कामाय यच्छ अर्पय। स कामः तैः[2] स्वबाणैः मां हन्तु। किं[3]भूतः? धुताः कौसुमा आशुगा बाणाः [[4]यैस्तैस्तथा। प्रथमान्तपाठे धुता कौसुमा आशुगा बाणा] येन स तथा। त्यक्तपुष्पबाणः। अहं त्वयि विषये एकचित्ता सती असून् प्राणान् विमुञ्चती सती त्व[5]मेव भूत्वा तं कामं जयामि। किंवत्? या तृणवत्। यथा तृणं निःसारं तथा कामोऽपि निःसारः। ये यं वापि स्मरन्भावं

---

6 P1 तव 7 P2 विधृता 8 B वृता 9 P2 नियता—॥१७५॥ 1 P1 निजांशु। P2 निजांशु इति। 2 P1 स्य 3 P1 om. उज्ज्वालनं 4 P1 om. किम 5 P1 वध्वा —॥१७६॥
1 P1 प्रसीद। 2 P1 om. तैः 3 P2 किंभूतः? 4 P2 om. यैस्तै°.... बाणा 5 P2 om. °मेव..... तं तमे°

त्यजत्यन्ते कलेवरम्। तं तमेवैति[6] कौन्तेय! सदा तद्भावभावितः॥ (गी॰VIII.6) इति[7] श्रीकृष्णवाक्यस्य वेदव्यासस्मरणात्[8] तं यथा यथा उपासते तदेव भवति[9] ! इति श्रुतेश्च। तव बाणैः त्वच्चित्ता[अहं] प्राणत्यागं कुर्वती त्वमेव[10]अहं जाता। ततो यथा त्वया कामो जीयते तथा मया तद्भूतया सुखेनैव जीयते॥ ॥१४७॥

श्रुतिः सुराणां गुणगायिनी यदि त्वदङ्घ्रिभाजनस्य जनस्य किं ततः?
स्तवे रवेरप्सु कृताप्लवैः कृते न मृद्वती जातु भवेत्कुमुद्वती ॥१४८॥

श्रुतिः[1] सुराणामिति। यदि श्रुतिः वेदः सुराणां देवानां गुणगायिनी[2] गुणस्तुतिपरा। ततः[3] तव अङ्घ्रिभजनस्य[4] चरणैकपरस्य मल्लक्षणस्य जनस्य किं वेदो देवेष्वनुरक्तः?। अहं तु त्वय्यनुरागपरा। यतः अप्सु मध्ये कृत[आ]प्लवैः कृतस्नानैः पुरुषैः रवेः[6][:] स्तवे स्तुतौ कृते सति जातु कुमुद्वती मृद्वती हर्षयुक्ता न भवेत्। तस्याश्चन्द्रेऽनुरागात्॥१४८॥

कथासु शिष्ये वरमेध न ध्रिये ममाऽवगन्तासि न भावमन्यथा।
त्वदर्थमुक्तासुतया सुनाथ! मां प्रतीहि जीवाम्यधिकस्त्वदेकिकाम्[1] ॥१४९॥

कथासु[2] शिष्ये इति। अहं वरं[3] कथासु वार्त्तामात्रेषु शिष्ये अवशेषा भवामि। प्रिये! वरम्[4] अद्य पुनः न ध्रिये नाऽवतिष्ठे[5] न जीवामि। अन्यथा मम भावं चित्ताभिप्रायं[6] त्वं नाऽवगन्तासि न ज्ञास्यसि।

6 P1 om. हि 7 P2 इति स्मरणात् 8 P1 add. तथा 9 P2 भवन्ति॰ 10 B अहं त्वमेव— ॥१४७॥
1 P1 श्रुति।; P2 श्रुतिरिति। 2 P1 P2 om. गुण॰ 3 B ततः; P2 चेतः 4 P1 add. त्वद्विषये 5 P2 त्वपदस्य 6 B2 om. रवेः — ॥१४८॥
1 P2 +श्री त्वदेकितनाम् 2 P1 कथासु; P2 कथास्विति। 3 P1 परं; P2 सुवरं 4 P1 अद्य वरं 5 B त्ववतिष्ठामि 6 P1 P2 om. चित्त॰——

हे सुनाथ! त्वं मां जीवाद[पि]प्यधिक:[ध]्वमेव उक्तो यस्या: तां तथाविधां प्रतीहि जानीहि (कया?) त्वदर्थं मुक्ता असव: प्राणा यया (1376) तस्या भावस्तत्ता तया ॥१४९॥

महेन्द्रहेतेरपि रक्षणं भयार्थिसाधारणमस्त्रभृद्व्रतम् ।
प्रसूनबाणाशुगतोऽपि मामवन् अतं तदुच्चैरवकीर्णिनस्तव ॥१५०॥

[1]महेन्द्रहेतेरपि [इति] । यत्ते तव अस्त्रभृतां व्रतम् । किंभूतम्? सर्वेषाम् अर्थिनां साधारणं यत् महेन्द्रस्य हेतेरायुधाद्वज्रादपि भयात् रक्षणं तव व्रतं वर्तते । अन्यानपि अर्थिनो भीतान् रक्षति । तत्तव व्रतं क्षतं भ्रष्टं त्यक्तं [त्वया] । हे प्रसूनबाणाशुगतोऽपि मामवन्! सम्बोधने चेत (पा० ८।३।१२5) ति लट् । भरात् । अरक्षत (?) इत्यर्थ: । अपादिति लक्षणया व्रतविशेषणम् ] । किं कुर्वत् व्रतम्? मां प्रसूनबाणस्य कामस्य आशुगतोऽपि बाणतोऽपि [4]नाऽवत् न रक्षत् । किंभूतस्य? उच्चैरतिशयेन अवकीर्णिन: क्षतव्रतस्य ॥१५०॥

तवाऽस्मि मां घातुकमप्युपेक्षसे मृषामरं हाऽमरगौरवात् स्मरम् ।
अवेहि चण्डालमनङ्गमङ्ग! तं स्वकाण्डकारस्य मधो: सखा हि स: ॥१५१॥

[1]तवाऽस्मि मामिति । [2]हे नल! अहं तव सक्ता अस्मि । [3]हा कष्टं त्वं स्मरं मां प्रति घातुकं हननशीलमपि अमरगौरवात् देवो-

[P]४ जीवादप्यधिक: १ P। बद्ध. आशुता च पाठान्तरम् ॥१४९॥
1 P, महेन्द्र।; H महेन्द्रेति। 2 P. बद्ध. अपि 3 H om. बाणाशुगा... मां प्रसून० 4 P। H om. बाणतोऽपि 5 B न रक्षत न अवत — ॥१५०॥
1 P, तवाऽस्मि; H तवाऽस्मीति। 2 P। om. हे 3 H om. स्मरं ——

यमिति कृत्वा उपेक्षसे। किंभूतम्? मृषा वृथा अमरम् अङ्ग। हे! त्वम् अनङ्गं [तं] चण्डालम् अवेहि[4]। हि यतः स कामः मधोर्वसन्तस्य सखा। किंभूतस्य? स्वस्य कामस्य काण्डकारस्य बाणकर्तुः। [तस्य शराः] पुष्पाणि किल वसन्ते जायन्ते। यश्च बाणान् घटयते स चण्डालो भवति। [न[5] लोकाव्ययनिष्ठाखलर्थतृनामिति पा० II।३।६९ इति षष्ठी-प्रतिषेधः][6] ॥१५१॥

---

लघौ लघावेव पुरः परे बुधैर्विधेयमुत्तेजनमात्मतेजसः।
तृणे तृणेढि ज्वलनः खलु ज्वलन् क्रमात्करीषद्रुमकाण्डमण्डलम् ॥१५२॥

---

लघौ[1] लघाविति। बुधैः लघौ लघौ[2] अल्पे अल्पे परे शत्रौ विषये पुरोऽग्रे आत्मनस्तेजसः उत्तेजनं विधेयम्। अल्पशत्रुं जयन् सन् क्रमेण महान्तमपि जयति। कामस्त्वात्यल्पः। खलु यतः ज्वलनः तृणेऽल्पतरे ज्वलन्[3] सन् क्रमात् करीष[मण्डलं] गोमय-समूहं[4] द्रुममण्डलं [काण्डमण्डलं[5]] शरजालसमूहं तृणेढि भक्षयति दीप्यते[7]॥ ॥१५२॥

---

सुरापराधस्तव वा कियानयं स्वयंवरायामनुकम्प्रता मयि।
गिराऽपि वक्ष्यन्ति मखेषु तर्पणादिदं न देवा मुखलज्जयैव ते ॥१५३॥

---

4. P.I. var. अनङ्गातां गतमिति पाठे स्मरविशेषणम्। 5. H. न लोकाव्ययेति निषेधः 6. P.I. var. घातकेति पाठे ऽकेनोर्भविष्यदाधमर्ण्ययोरिति पा० II।३।७०इति षष्ठीप्रतिषेधः। अनुप्रासो विरोधः काव्यलिङ्गमतिशयोक्तिरनुमानं च॥ ॥१५१॥

1. P. लघौ; H. लघाविति। 2. H.om. लघौ 3. P.I. var. दीप्यमानः 4. P. मण्डलं 5. H.om. काण्डमण्डलं 6. P. शरजालं तृणेढि 7. P.I. var. ऽन्तराम्। तृणे तृणेढीति क्वचित्पाठे वाक्यद्वयम्। केचित्तु तृणे इत्यपि पाठे वाक्यद्वयेन व्याचक्षते। तृणे तृणवृन्दे तृणेढि। तत्र ज्वलनश्च क्रमात् करीषादि तृणेढीति। अर्थान्तरन्यासोऽनुप्रासश्च ॥१५२॥

सुरापराधे[1] इति। वा अथवा तव अयं[2] कियान् सुरेषु अपराधः अपि तु न कोऽपि। यत् मयि स्वयंवरायां विषये अनुकम्प्रता दयापरता[3]। इदं[4] सापराधित्वं देवास्ते तव मुखलज्जयैव [गिराऽपि[5] वचनेनाऽपि] न वक्ष्यन्ति न वदिष्यन्ति। कस्मात्? मखेषु यागेषु तर्पणात्[6]॥१५३॥

---

व्रजन्तु ते तेऽपि वरं स्वयंवरं प्रसाद्य तानेव मया वरिष्यसे।
न सर्वथा तानपि न स्पृशेद्दया न तेऽपि तावन्मदनस्त्वमेव वा॥१५४॥

---

व्रजन्तु ते[1] इति। तेऽपि देवा वरं[2] ते तव स्वयंवरं व्रजन्तु। मया तानेव देवान् प्रसाद्य प्रसन्नान् कृत्वा त्वं वरिष्यसे। यतः तानपि देवान् युवामिव दया कर्त्री सर्वथा न स्पृशेत् इति न घटते। ते मयि[3] दयां करिष्यन्त्येव। तावत्तेऽपि देवा मदनो [भवानेव वा] न भवन्ति। त्वं कामश्च [द्वावेव यतौ] निर्दयौ[4]॥१५४॥

---

इतीयमालेख्यगतेऽपि वीक्षिते त्वयि स्मरक्रीडसमस्ययाऽनया।
पदे पदे मौनमयान्तरीपिणी प्रवर्तिता सारघसारसारणी॥१५५॥

---

इतीयमालेख्येति[1]। अनया दमयन्त्या हे नल! त्वयि आलेख्यगते चित्रगतेऽपि वीक्षिते सति इति प्रकारेण इयं सम्मुखोक्ता [या त्वया श्रुता सा] सारघस्य मधुनः सारः[2]] वचनपरम्परा तस्याः सारणी

---

1 B ०राधमिति।; P1 सुरा।; P2 सुरेति। 2 B इयं 3 P2m. दयापरता 4 P1 add. अल्पत्वं 5 P2m. गिराऽपि वचनेनाऽपि 6 P1 add. आस्तामेतन्निमित्तं दण्डादिकरणम्। काव्यलिङ्गम्॥१५३॥ 1 P1 व्रजन्तु।; व्रजन्त्विति। 2 P1 वरे 3 P1,2 दयां मयि 4 P1 add. इति नलं प्रति हास्यवक्रोक्तिः। अनुप्रासोऽतिशयोक्तिः॥१५४॥ 1 P1 इतीयम्।; P2 इतीयमिति। 2 P1 सारं ——

कुल्या नदी प्रवर्तिता। किंभूता?। यतो पदे पदे मौनमयम् अन्तरीपं द्वीपं विधते यस्यां सा तथा। [द्व्यन्तरुपसर्गेभ्योऽप ईत् (पा० VI.III.97) इति ईत्] उक्त्वा उक्त्वा। मध्ये मौनं लज्जया कुरुते। किंभूतयाऽनया?। स्मरस्य क्रीडा च स्मरक्रीडम्। स्मरक्रीडस्य समस्यया लज्जाकामयोः संक्षेपेण धारितया॥ ॥१५५॥

चण्डालस्ते विषमविशिखः स्पृश्यते दृश्यते न
ख्यातोऽनङ्गस्त्वयि जयति यः किं नु कृत्ताङ्गुलिकः।
कृत्वा मित्रं मधुमधिवसन् स्थानमन्तश्चरित्वा
तस्याः प्राणान् हरति हरितस्त्वय्यरिस्त्वज्जुषन्नाम ॥१५६॥

चण्डालस्ते इति। अयं दमयन्त्यां ते तव त्वदुक्थो विषमविशिखः कामः चण्डालसदृशत्वात् न स्पृश्यते। स एवाऽयम् अनङ्गत्वान्न दृश्यते च। नेत्रेन्द्रिययोरगोचरः। ततः नु इति वितर्के। त्वयि नले जयति। कामजेत्रे कृत्ताङ्गुलीकः सन् [किम्] अनङ्ग इति ख्यातः प्रसिद्धः। बलवन्तं प्रति रिपवः किल करकनिष्ठिकाङ्गुलीपर्वकृन्तनेनोपलक्षिताच्चानङ्ग उच्यते। स मधुं वसन्तं मित्रं कृत्वा तस्या दमयन्त्या

3 P, B, om. यतो 4 P, om. द्वीपं 5 P, यस्याः 6 B, om. उक्त्वा 7 P, लज्जया मौनं 8 B, om. अनया 9 B धारितायाः 10 P, add. तदुक्तेऽयमित्यर्थः। अनुप्रासोऽतिशयोक्तिश्च ॥१५५॥ 1 B, + ख्या मधिवन° 2 P, चण्डालस्ते; B, चण्डाल इति। 3 P, om. कामः 4 B, B न स्पृश्यते अपि न दृश्यते 5 P, गुप्ता° 6 B om. किम् 7 P, add. जयतीति जयभिय इति च पाठान्तरे। जयभियो विजयभयात् कृत्ताङ्गुलीक इत्यर्थः। निकृत्ताङ्गुलीयक इति पाठान्तरम्। 8 P, om. कर° 9 P, om. कृन्तनेनो° 10 P, व्यहिता अनङ्गा उच्यन्ते 11 P, om. स 12 P, मधुः 13 P, B सख्या ~~14 P, हृदयाद°~~

[14]हृदयान्तः स्थानम् अधिवसन् सर्वत्र चरित्वा [त्रिभुवने] भ्रमित्वाऽपि[15] अत्रैव तिष्ठन् तस्याः[16] प्राणान् हरति गृह्णाति। तत् त्वदीयं यशः हरितो दिशो जुषन्तां सेवन्ताम्। दिक्षु प्रसिद्धं भवतु[17]। अत्र च चण्डालो रौद्र-बाणोऽ ह्[18]रयो भ्रुभयोऽप्यो ऽस्पृश्यश्च। मधुं मद्यपं कञ्[19]चित् मित्रं कृत्वा भ्रमि[20]त्वा अन्तर्गृहमध्ये प्रविश्य प्राणिनां प्राणान् हरति[21] ॥१५६॥

अथ भीमभुवैव रहोऽभिहितां नतमौलिरपत्रपूया (त) स निजाम्।
अमरैः सह राजसमाजगतिं जगतीपतिरभ्युपगत्य ययौ ॥१५७॥

[1]अथ भीमभुवेति। अथ स जगतीपतिर्नलः[2] अमरैः सह राज्ञां समाजे स्वयंवरसभायां [निजां] गतिम् अ[3]भ्युपगत्य स्वयंवरगमनम् अङ्गीकृत्य [तत्र] ययौ[4]। देवा अपि तत्र गताः। किं भूतां गतिम्? निजाम् आत्मीयाम्। किंभूताम्?[5] भीमभुवा दमयन्त्या [6]एव रहः एकान्ते नलं प्रति अभिहिताम्। किंभूतः?[7] अपत्रपा[ति]पा] नत-मौलिः। दूतकार्यकरणाल्लज्जा[8] ॥१५७॥

14 P. हृदयाप० 15 P. add. यत्रैव तिष्ठन् अन्तश्चरित्वा अन्तः प्रविश्य स्थानमधिवसतो० 16 P. om. तस्याः 17 P. add. विपरीतलक्षणाया अयं शशियशः शब्दात् त्वदपरित्राणादिदमनो यशोऽथवा (?) दमयन्ती प्राणा नलेन रक्षिता इति त्वदीयं यशो दिशो जुषन्तामित्यभिधेया मुख्य एवार्थः॥ध 18 P. हरा 19 P. किञ्चित् 20 P. om. भ्रमित्वा 21 P. P. add. अनुप्रासो रूपकमतिशयोक्तिश्चोत्प्रेक्षाऽपि ॥१५६॥ 1 P. प्रथमम्। P2 अथेति। 2 B अभ्युपगत्य स्वयं here and. add. गमनमङ्गीकृत्य 3 P. P2 om. अभ्युप-गत्य स्वयंवर० 4 P. add. देवैः सह राजसमाजगमनमङ्गीकृत्य जगाम। अथवा विशेषतो वक्ष्यमाणोऽर्थसामान्येनोक्तोऽमरैः सह तत्र ययौ। 5 P. add. देवैः सह स्वयंवरे आगन्तव्यमिति 6 P. om. एव.... दूत० 7 B अपत्रपा
8 P. add. लोकवृत्तम्। अनुप्रासः सहोक्तिश्च ॥१५७॥

श्वस्तस्याः प्रियमाप्तुमुद्धुरधियो धाराः सृजन्त्या रया-
न्नम्रोन्नम्रकपोलपालिपुलकैर्वेतस्वतीरस्रुणः।
चत्वारः प्रहरास्त्वरार्तिभिरभूत् सा यत् क्षपा दुःक्षया
तत्तस्यां कृपयाऽखिलैव विधिना रात्रिस्त्रियामा कृता॥१५८॥

---

श्वस्तस्याः[1] प्रियमिति। [तस्याः] श्वः प्रभाते प्रियं नलम् आप्तुम्[2] उद्धुरधियः उत्सुकबुद्धेः रयात् अस्रुणः धाराः प्रवाहान् सृजन्त्याः सत्याः यत् सा क्षपा रात्रिः दुःखेन[3] क्षिप्यते नीयते[4] एवंविधा आसीत्। काभिः? त्वराया आर्तिभिः। कथमपि रात्रिः वेगेन विभातु[इ] इत्यार्त्या। किंभूता रात्रिः? चत्वारः प्रहराः चतुःप्रहरलक्षणत्वात् दुर्विलंघ्यत्वम्[5]। किंभूता अश्रुधाराः? नम्राश्च[6] [उन्नम्राश्च] उन्नताश्च[7] ये कपोलपालेः पुलकाः रोमाञ्चास्तैर्वेतस्वतीर्वेतसवृक्षयुक्ताः। प्रवाहमध्ये वेतसा नता उन्नताश्च भवन्ति। नडकुमुद्वेतसेभ्यः वतौ प्रत्यये अकारलोपः) [कुमुदनडवेतसेभ्यो ड्मतुप् (पा० IV·ii·87) इति सूत्रम्]। तत् तस्यां दमयन्त्यां विषये कृपया इव विधिना[8] रात्रिः त्रियामा त्रिप्रहरा कृता। अथ च पश्चिमप्रहरार्धे उत्थानम्। प्रथमार्धे जागरणम्। अत एकः[9] प्रहरो रात्रिमध्ये शास्त्रे न गण्यते[10]। किंभूता रात्रिः? अखिलैव समग्राऽपि[11] ॥१५८॥

---

तदखिलमिह भूतं भूतगत्या जगत्याः
पतिरभिलषति स्म स्वात्मदूतत्वतत्त्वम्।

---

1 P1 श्वस्या इत्यादि। श्वस्तस्याः।; P2 श्व इति। 3 P2 प्राप्तुम् 3 B P1 क्षिपा 4 P1 no com. onwards. 5 P2 दुर्विभात॰ 6 B निम्ना॰ 7 P2 om. उन्नताश्च 8 P2 add. अखिला 9 P2 प्रहरैको 10 P2 मन्यते 11 P1 add. अखिलैवेति पाठे 12 P1 add. इति व्याख्येयम्॥१५८॥

त्रिभुवनजनयावद्वृत्तवृत्तान्तसाक्षी—
क्वतिकतिषु निरस्तानन्दमिन्द्रादिषु द्राक् ॥१५९॥

तदखिलमिति। तत् अखिलं स्वस्याऽऽत्मनः [तस्य] तत्त्वं पारमार्थिकं स्वरूपम् [इह] भूतगत्या दैवगत्या भूतं जातं, न तु बुद्धिपूर्वकं कृतम्। इति जगत्याः पतिर्नलः लोकेष्विन्द्रादिषु द्राक् झटिति निरस्तानन्दं यथा भवति एवम् अभिलषति स्म। [उवाच।] किंभूतेषु? त्रिभुवनजनानां यावन्ति वृत्तानि चरितानि तेषां वृत्तान्तं वार्त्ता तेषां साक्षात्कर्तृ क्वतिषु परोक्षेऽपि सर्वेषु] ॥१५९॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।
सन्दृब्धार्णववर्णनस्य नवमस्तस्य व्यरंसीन्महा—
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥१६०॥

श्रीहर्षमित्यादि। तस्य [महा]काव्ये नवमः सर्गो व्यरंसीत्। किंभूतस्य? सन्दृब्धं ग्रथितम् अर्णववर्णनं ग्रन्थो येन तस्य तथा ॥१६०॥

[श्रीमानाल्लिगपण्डितः स्वसमयाविर्भूतसर्वाश्रम—
श्चाण्डूपण्डितसंस्तुतं प्रसुषुवे श्रीगौरिदेवी च यम्।

1 R दैव° 2 R वृत्तान्ता—॥१५९॥
1 R add. भैमीनलानुलापो नाम॥ 2 R श्रीहर्षमिति। 3 R om. महा—॥१६०॥

श्रेऽ(?)भाष्यं रोचयन् निरुक्तिविवृतेरुद्धृत्य बह्वीः (३८०) ग्रन्थः
चारित्रे नृपनैषधस्य[1] नवमे सर्गेऽत्र[2] टीकां व्यधात्[3] ॥९॥

---

किमपि[4] मुकुटरत्नं नागरश्रोत्रियाणां
प्रतिनिधिरिव तेजःसद्मनः पद्मयोनेः।
विधुरुपशमसिन्धोरालिगो नाम धीमा-
निह समजनि पत्नी गौरिदेवीति चास्य॥२॥[5]

---

[6] इति [श्री]चाण्डूपण्डितविरचितायां
नैषध[दीपिकायां] टीकायां
नवमः सर्गः [समाप्तः]॥

---

1 B नृपतेर्मल्लस्य 2 B स 3 B 160. 4 B om. किमपि etc. 5 B add. ग्रन्थसङ्ख्या ७९२ एवं .... 6 B इति श्रीनैषधदीपिकायां नवमः सर्गः समाप्तः॥